देवार्चने शिवो विघ्नः सूर्यो विष्णुस्तथै
व च शिवो रविर्भवानी च विष्णुर्विघ्ने।
श्वरार्चने आग्नेयादिषु कोणेषु स्थाप्या
श्चांगीगिभावतः पूज्याश्चैव महेशानी
ति अत्र सर्वत्र देवपूज्यायां तत्पूजाव।
क्रपूर्वं मंत्रमुधरन्तत्र तत्कल्पोक्तविधि
नात्पीठपूजापूर्वकं पंचायतनदेवताः
पूजयेत् अस्याः पूजायां नैफल्यं तस्मात्
तं दुर्लं कुलार्णवादिवस्य मंत्ररूपस्यायं
त्र व्याप्तिमजानता कृत्वार्चनादिकं स
र्वं व्यर्थं भवति शाभवि मंत्रमंत्रोक्तं

देवतामंत्ररूपिणी यंत्रेसंपूजितादेवि
सहसैवप्रसीदति कामक्रोधादिदोषो
त्थसर्वदुःखनियंत्रणात् यंत्रमित्या
हुरेतस्मिन्देवःप्रीणातिपूजितःशरी
रमिवजीवस्यदीपस्यस्नेहवत्प्रिये स
र्वेषामपिदेवानांतथायंत्रंप्रतिष्ठितं
तस्माद्यंत्रंलिखित्वावाध्यात्वावाभ
जेत्शिवे ज्ञात्वागुरुमुखात्सर्वंपूजयेद्वि
धिनाशिवे एकपीठेपृथक्पूजांविना
यंत्रंकरोतियः ऽंगांगित्वमाप्यन्यका
देवताशापमाप्नुयात् एकपीठेकुले
शानिस्वेस्वेयंत्रेपृथक्पृथक् यजो
दावरणोपेतान्देवांस्तत्तद्विधानतः
ऽपाद्यदेवतामेकामर्चयेद्यान्यदेव
तां उभाभ्यांलभतेशापंमंत्रीचेच्चल
मानसः कुलप्रकाशतंत्रे खंडितेस्फु
टितेदग्धेप्रस्पृष्टेमानविवर्जिते व्यंगन
हपशुस्पृष्टेपतितेदुष्टभूमिषु स्त्रम्य

मंत्राचितोविबपतितस्पर्शदूषिते द-
शाखेतेषुनोकुर्युःसन्निधानंदिवौकस
इति अयपंचायनपूजायामुकमुकेलु
ल्पन्यायात् अत्रकेचित्प्रधानदेवताबा
हनानंतरमेवतदावरणपूजार्थंदेवता
प्रप्राचीकल्पनात्तत्पूर्वमेवचतुराय
तनदेवतानांपूजायाःकार्यत्वात्कल्प
नयुक्तमितियथास्थितात्प्रयादिदिक्षुच
रायतनदेवताःपूजनीयाइमाऊःतत्क
ल्पपूजासु उत्तराशामुखोभूत्वापदाचक्रं
प्रपूजयेत् उत्तराशेचपूर्वाशाईशानेव
ह्निकोणकमित्यादिज्ञानार्णववचनात्प्र
ग्निराक्षसवायव्यशंभुकोणमुखोपीये
शिति कुलप्रकाशतंत्रवचनादन्यत्रापि
बमनेकानंत्रेषुदर्शनाच्च यथास्थितदि
क्रमेकणपूजायामीशानेकोणस्थिता
याःकदाचित्प्रधानदेवतायामभागेक
दाचिदक्षिणेकदाचदग्नेकदासर्वे

शि॰ १५४

तिस्थितत्वेनैव्यत्वप्रसंगात् यथास्थि
तायेयादिषुस्थापनासंभवात् प्रधान
देवतायाः पीठपूजानंतरमेवचतुराय
तनदेवतापूजनात् पीठपूजायामपिध
र्मादिपूजनेकल्पतप्राप्त्यानुसारेणैवा
ग्नेयादिकल्पनालाघवाद्वापितथाक
ल्पनाच्चतुरायततदेवतामंगत्वात्तत्प्र
धानदेवतायामूर्तेः कल्पितत्वाच्चतद
ग्रे प्राचीकल्पनमौचित्यादिति अत्रपं
चायतनपूजायां गणेशाद्यतिरिक्तच
तुर्देवतोपासकैः प्रोक्तक्रमेणदेवता
संख्याप्यगणेशमारभ्यप्रादक्षिण्यक्र
मप्राप्तदेवताचतुष्टयंसंपूज्यमध्येस्व
स्वदेवतांपूजयेत् गणेशोपासकैस्तु
सूर्यमारभ्यप्रादक्षिण्यक्रमप्राप्तदेव
ताचतुष्टयंसंपूज्यांतेगणेशंपूजयेदि
त्यागमसिद्धांतः अत्रकेचित् पंचाय
तनपूजायां देव्याराधकेनसूर्यगणे

पूर्वाशिवविष्णुनैर्ऋत्यांतिदेवीपूजयेदि
तिस्मृत्युक्तमितिवदंतितदसंगतंप्रा
दक्षिण्यापत्ते अन्यदेवतापूजने अ
प्रदक्षिणक्रमस्याप्यलाभतया अतो
नाव्यस्तक्रमापत्तेश्च वस्तुतस्तुगणे
शंसूर्यंविष्णुंदुर्गामावाह्यपूजयेदि
ति योगिनीतंत्रेदेवीपूजायांपंचायत
नपूजाक्रमदर्शनात् अतोगणपतिं
देवंसूर्यंविष्णुमुमापतिं दुर्गांचपूजये
द्विद्वानितिभैरवीतंत्रेपिपंचायतनपू
जाक्रमदर्शनाच्चायमेवसांत्रिकसिद्धा
न्तः तत्संप्रदायसिद्धश्च अन्यदेवतोपा
सकैरपितथैवगणेशादिक्रमएवका
र्यः एकेनदेहहन्यायात् इदंपंचायतन
पूजात्ववश्यंकार्या शिवंभास्करमग्निं
चकेशवंकौशिकीम मनसानर्चयेद
याति स्वर्गलोकात्सयोगनिमित्तिभ
विष्णुपुराणेप्रत्यवायश्रवणात् म

शि॰ १५६

156

नसाध्यनर्चयन्नित्यर्थः अग्निर्गणेशः
पावकः कार्तिकेयोविनायकइतिभ
विष्योत्तरपुराणवाचनात् १ तथामध्य
प्रधानपूजांगत्वेनगणेशादीनांसिद्धावि
विचारेणात्तीहवेसवतंत्रेसिद्धांदिशो
धनंतेषामंगत्वेसतिराजवत् पूजाप्रका
रः प्रधानेस्वस्मोग्रंथविस्तराक्षित्तिग्र
थमध्यस्यापितमूर्तौस्वष्टदेवतामावा
ह्यपूजयेत् तत्रमूर्तिस्तुतत्रयानोक्तरू
प्यसात्तुशिवलिंगशालग्रामादावपि
भावनीयाशिवलिंगादिमांसर्वदेवत
पूजाधिकरणत्वात् तेषुसर्वाश्चदेवता
पूज्याः तेषांलिंगमणौकुंभेमंडलेचप्रपू
जनं शालग्रामेवतस्तुध्यपंत्रादौचप्रपू
जयेत् भूमावेवकृतापूजापुत्रायुर्धन
नाशिनीतिरुद्रयामलवचनात् शा
लिग्रामशिलायांतुतत्स्वध्यासमर्च
येदितिसोमशंभुवचनात् लिंग॰

स्थंडिलतपोवह्नौसूर्येकुड्यपटेषुच मंडले
फलकेमूर्धिहृदयेपदशकीर्तिता १ एषु
स्थानेषुदेवेशिपजंतिपरमंशिवमिति
कुलार्णववचनात् शिवमित्युपलक्षण
त्वेषामित्युक्तेः तेषांपंचायतनदेवतानां
यंत्रादाविस्यादिमंदप्रतिमापरं शाल
ग्रामेमुणौमंत्रेस्थंडिलेप्रतिमासुच ह
रेःपूजातुकर्तव्याकेवलेनतुभूतले इ
तित्रैलोक्यसंमोहनतंत्रवचनात् ना
दातुतत्तध्यानोक्तरूपाप्रतिमाकार्या सा
नुपानांगुलप्रमाणेनदशापंचदशांगुला
गृहेहेनुप्रतिमापूज्यानाधिकातुप्रशस्य
तइतिकपिलपंचरात्रोक्तरूपाप्रतिमा
कार्यादशांगुलमितापंचदशांगुलमिता
वेत्यर्थः दशांगुलप्रमाणवातिष्यंगु
लमितिपिच ग्रभ्यस्याप्रतिमाविस्ता
गृहेषुगृहमाधिमिमितहपग्रीवपंच
रात्रवचनात् मानांगुललक्षणंतुषा

शि

२५७

157

गेवमंडपप्रकरणेभिहितं कालोत्तरे।
लिंगमस्तकविस्तारो लिंगोच्छ्रायसमो
भवेत् त्रिगुणः परिणाहः स्यात्तद्वत्पिं
डीप्रतिष्ठिता लिंगतुल्यप्रणालं स्या
त्पंचसूत्रस्य लक्षणं पंचसूत्रसमायु
क्तं शिवलिंगं समर्चयेत् भुक्तिदं देवि
धनारोग्यसुतप्रदं शिल्पशास्त्रेपि लिं
गमस्तकमध्यात्सूत्रं स्यादाप्रणाल
कं लिंगप्रणालीपृष्ठं वंतावदेव प्रकी
र्तितं ब्रह्मलेपितयापीठे पंचसूत्रं प्रच
क्षत इति हयशीर्षपंचरात्रे आदिमू
र्तिर्वासुदेवः संकर्षणमथापरं तत प्र
द्युम्नं चानिरुद्धं च स्वयमेवासृजत्प्रभुः
चतुर्मूर्तिः परः प्रोक्त एकोभिपतेत्त्रि
धा केशवादिप्रभेदेन मूर्तिद्वादशकं
स्मृतं पंकजं दक्षिणे दद्याद्वामे च जलजं
तथोपरि [illegible] मोपरि गदा यस्य चक्रं
चाधो व्यवस्थितं आदिमूर्तिस्तु भे

दोयंकेशवेतिप्रकीर्त्यते अधरोत्तरभावे
नकृतमतन्तुपत्रेवे नारायणाख्यासामू
र्तिः स्थापिताभुक्तिदा सम्माधः पंकजं
यस्यपांचजन्यंतथोपरिः दक्षिणोर्ध्वे
गदायस्यचक्रंचाधोव्यवस्थितं आदिमू
र्तेस्तुभेदोयंमाधवेतिप्रकीर्तितः दक्षि
णाधास्थितंचक्रंगदायस्योपरिस्थिता
वामोर्ध्वेसंस्थितेपद्मंशंखंचाधोव्यव
स्थितं संकर्षणस्यभेदोयंगोविंदेतिप्र
कीर्तितं दक्षिणोपरिपद्मंतुगदाचाधो
व्यवस्थिता वामोर्ध्वेपांचजन्यंचचक्रं
चाधोव्यवस्थितं संकर्षणभेदोयंविष्णु
रित्यधीयते दक्षिणोपरिशंखंचचक्रं
चाधःप्रदृश्यते वामोर्ध्वेपांकजंयस्यग
दाचाधोव्यवस्थिता मधुसूदननामा
यंभेदःसंकर्षणस्यतु दक्षिणोर्ध्वेगदा
यस्यपंकजंचाप्यवस्थितं वामोर्ध्वेसं
स्थितंचक्रमध पांचः प्रदृश्यते बुधैः

शि० १
१५८
158

ङ्गं वामपादं दक्षिणं पोषपद्मगं वालिवं
चनसंसक्तं वामनं चाप्यधःस्थितं वामो
र्ध्वे कौमुदीयस्य पुंडरीकमधःस्थितं
यत्राप यत्र करा वामपार्श्वे यस्य व्यवस्थि
ता स्थितो वाप्युपाविष्टो वामानुरागो।
विलासवान् प्रद्युम्नस्याहि मे देयं दा।
मोदर श्रीधरेति प्रकीर्तिते दक्षिणोर्ध्वे
महाचक्रं कौमुदीनदधःस्थिता वामो
र्ध्वे नलिनं यस्यान्वधः शंखो विराजते
हृषीकेश इति ज्ञेयः स्थापितः सर्वका
मदः दक्षिणोर्ध्वे पुंडरीकं पांचजन्यम
धस्तथा वामोर्ध्वे संस्थितं चक्रं कौमुदी
तदधःस्थिताः पद्मनाभेति सा मूर्तिः
स्थापिता मोक्षदायनी दक्षिणोर्ध्वे पांच
जन्यमधस्तात्तु कुशेशयं सव्योर्ध्वे कौ
मुदी देवी हाहि तिराजमधःस्थितं अ
निरुद्धस्य भेदोयं दामोदर इति स्मृतः
एतेषां तु स्त्रियो कार्ये प्रमवीणाधरेस्तु

मे सिद्धार्थसंहितायां तु चतुर्विंशतिमू
र्तयउक्ताः वासुदेवो गदां शंखं चक्रपद्म
धरो मतः पद्मं शंखं तथा चक्रं गदां वह
ति केशवः शंखं पद्मं गदां चक्रं धत्ते ना
रायणः सदाः गदां चक्रं तथा शंखं पद्म
वहति माधवः चक्रं पद्मं तथा शंखं गदां
च पुरुषोत्तमः पद्मं कोमोदकी शंखं चक्रं
धत्तेप्यधोक्षजः शंकृष्णो गदां शंखपद्म
चक्रधरः स्मृतः चक्रं गदां पद्म शंखं गोविं
दो द्धरते भुजैः गदां पद्मं तथा शंखं चक्रं वि
ष्णुर्बिभर्ति पः चक्रं शंखं तथा पद्मं गदां च
मधुसूदन गदां सरोजं चक्रं च शंखं धत्ते
च्युतः सदाः शंखं कोमोदकी चक्रमुपेंद्रः
पद्मसुद्धरेत् चक्रं शंखं गदां पद्मधरः प्र
द्युम्नउच्यते पद्मं कोमोदकी च शंखं धत्ते
त्रिविक्रमः शंखं चक्रं गदां पद्मं वामनो
महते सदा पद्मं चक्रं गदां शंखं श्रीधरो व
हते भुजे चक्रं पद्मं गदां शंखं नरसिंहो वि

शि-१
१५९

189

भर्त्तियः पद्मं सुदर्शनं शंखं गदां वा शंखं ध
त्ते दामोदरः सदा जनार्दनः ॥ अनिरुद्ध
श्चक्रगदाशंखपद्मलसद्भुज हृषीके
शो गदां चक्रं पद्मं शंखं च धारयन् प
द्मनाभो वहेच्छंखं पद्मं चक्रं गदां तथा
पद्मचक्रं गदां शंखं धत्ते दामोदरः स
दा ॥ जनार्दनः शंखं चक्रं सरोजं च गदां
वहति यो हरिः ॥ शंखं कौमोदकीं पद्मं च
क्रं कृष्णो बिभर्त्ति यः ॥ राता अमूलपो ज्ञेया
दक्षिणाधः करक्रमादिति सुंदराचार्य
शिष्येण श्रीनिवासेन धीमता चंद्रिकां
यां प्ररणीता पात्रकाशः सप्तमो गमन् ॥ इ
ति श्रीसुंदराचार्यचरणारविंदद्वन्द्वान्ते
वासिना श्रीनिवासभट्टविरचितायां श्री
वार्चनचंद्रिकायां सप्तमप्रकाशः ॥ अथ
शालग्रामलक्षणानि स्कंदपुराणे स्नि
ग्धा कृष्णा पांडुरा च पीता नीला तथैव च
रक्ता रूक्षा च वक्रा च महारस्थूला लत्वन्तां

क्षिलाकपिलाकर्बुराभग्नावक्रचक्रेक
चक्रिका वहन्मुखीवहच्चक्राल्गनाच
क्राथवापुनःरवक्रचक्राथवापास्यात
भग्नचक्राल्वधोमुखी श्रयतासांवणा
दिभेदेनगुणदोषास्तत्रैव स्निग्धासिद्धि
करीमंत्रेकृष्णाकीर्तिंददातिच पांडुरा
पापदहनीपीतापुत्रफलप्रदा नीलासं
दिशतेलक्ष्मीरक्तारोगप्रदायिनी रूक्षा
चोद्वेगदानित्यंचक्रादारिद्र्यदायिकास्थू
लानिहंतिचैवायुर्निःफलालुन्त्रलांछि।
ता कपिलाकर्बुराभग्नावक्रचक्रेकच
क्रिका वहन्मुखीवहचक्रलग्नचक्रा।
थवापुनःबक्रचक्राथवापास्याद्भग्नच
क्राल्वधोमुखी पूजयेद्यःप्रमादेनदुःख
मेवलभेत्ततः अग्निपुराणेच तथाव्या
लमुखीभग्नाविषमावक्रचक्रिका वि
कारावतनाभिश्चनारसिंहीतथैवच
कपिलाविश्रमावर्तारेखावर्ताचपा

छिन्ना दुःखदा सा तु विज्ञेया सुखदा न कदाचन स्निग्धा श्यामा तथा मुक्तामा या वा समचक्रिका योगिणमूर्तिरनंताख्या गंभीरा संपुटा लघ्वा सूक्ष्ममूर्तिश्च संभु खी सिद्धिदायिका धात्रीफलप्रमाणेनाकारेणोभयसंपुटा पूजनीया प्रयत्ने न विशेषेण तु पूजयेत् पूजिते फलमाप्नोति इह लोके परत्र वै इति सूक्ष्मा च दोषाश्चैते सकामा चीनविप्रा एतदुक्तं श्रीभगवता स्कंदे खंडितं स्फुटितं भग्नं शालग्रामे न दोषभाक् इत्यानुपूर्व्या मूर्तिः सतांयत्नेन पूजयेत् तथा चक्रं वा केवलं तत्र पर्येन सह संपुटं केवले वनमाला हरिलक्ष्मा सहास्थितं इति मु ख्या स्निग्धा श्यत्र मुख्या रक्ता श्यामता मुख्या भावेन मुख्या हि पूज्या इत्यु च्यते परैः अथ नामामेव लक्षणविशेषेण संज्ञा निर्दिश्य वा से श्रीभगवद्वस

संवादे निवसामिसदाब्रह्मन् शालग्रामा
ख्यवेश्मनि तत्रैवरथचक्रांकभेदेनामा
निमेशृणु द्वारदेशेसमेचक्रे रेखयंतेनां
तरीयके वासुदेवःसविज्ञेयः शुक्लाभ
श्चातिशोभनः विचक्रेएककलग्नेसुपूर्व
भागेस्तुपुष्कलः संकर्षणाख्योविज्ञेयो
रक्तश्चैवातिशोभनः प्रद्युम्नः सूक्ष्मचक्र
स्तुपीनदीसिस्तथैवच छुविरांछिद्रबहु
लंदीर्घाकारंस्तुतद्भवेत् अनिरुद्धस्तुनी
लाभोवर्तुलश्चातिशोभनः रेखात्रयंतु
तद्वरिपद्मंपद्मेनलांछितं सौभाग्यं केपा
वोदधाद्यतुःकोणोभवेनुयः श्यामंना
रायणंविद्यान्नाभिचक्रंतथान्नतं दीर्घ
रेखासमोपेतंदक्षिणेसुषिरपृथु ऊर्द्ध्व
मुखंपिजानीयाद्वारेचहरिरूपिणं का
मदंमोक्षदंचैव अर्थदंचविशेषतः पर
मेष्ठीचशुक्लाभः पद्मचक्रसमान्वितः
विन्दाकृतिस्तथापृष्ठेसुषिरंचापिपुष्क

शि॰ १
२६१

रं कृष्णवर्णं तथाविद्धं स्थूलेचक्रे सुशो
भने द्वारोपरितथा रेखाद्वयपतेमध्यदे
शतः कपिलो नरसिंहस्तु पृथुचक्रः सु
शोभनः ब्रह्मचर्याधिकारी स्यान्मान्यथा
पूजनं भवेत् ब्रह्मचर्येन पूज्यो सौ अन्य
था विघ्नदो भवेत् क्वचिच्च नरसिंहः स्या
त् कपिलः पंचबिंदुकः ब्रह्मचर्येन पू
ज्यः स्यादन्यथा सर्वविघ्नदः स्थूलं चक्र
द्वयं मध्ये गुंजाभसवर्णकं द्वारोपरि
तथा रेखा पूजाकारा सुशोभना स्फुटि
तं विषमं चक्रं नारसिंहं तु कापिलं संपू
ज्य मुक्तिमाप्नोति संग्रामे विजयी भवेत्
पाद्मे कार्तिकमाहात्म्ये च यस्य दीर्घमुखं
पूर्वकृ षितं तन्नसणौ पृथुलः रेखाश्च केसरा
कारा नारसिंहं तु कपिलं ब्राह्मे वाराहं
शक्तिलिंगे च विषमे स्मृते इंद्रनीलनि
भः स्थूलं त्रिरेखालांछितं स्थलं पाद्मे
च वराहाकृतिराभुग्नश्चरेखा रत्नकृ

तः वाराहइतिसंप्रोक्तः व्राह्मेच दीर्घकां
चनवर्णापाविंदुवपविभूषिता मत्स्यः
ख्यासशिलाज्ञेयाभुक्तिमुक्तिफलप्रदा
कचिच्च मत्स्यरूपंचरेखांवदीर्घाकारं
तुइभवेत् विंदुत्रयसमायुक्तं कांस्यव
र्णंसुशोभनः व्राह्मे हयग्रीवोकुशाका
रोरेखापंचभवेतिहि वहुविंदुसमाकी
र्णो दृश्यतेनीलरूपकः पाद्मेच हयग्रीवा
यथालंवारेखांकायाशिलाभवेत् त
थासौम्याहयग्रीवः पूजितोज्ञानदोभवे
त् किंच ग्रंथ्याकृतिमुखंयस्यसाश्म
शिरस्तथा पद्माकृतिभवेद्वापिहय
ग्रीवस्तुसौमतः व्राह्मे वैकुंठंतिलवर्ण
अंचक्रमर्कंतथा ध्वजंद्वारोपरितथारे
खापूजाकार्यासुशोभना श्रीधरस्तुतथा
देवचिन्हितोवनमालया कंदंवकुसुमा
कारोरेखपंचकभूषितः वर्तुलश्चातिह
स्वश्चवामनः परिकीर्तितः अतसीकु

सुमप्राख्योविंदुनापरिशोभितः अन्यत्र
व वामनाख्योभवेद्देवोह्रस्वोपःस्यान्म
हाद्युतिः ऊर्ध्वचक्रोध्यधःचक्रःशोभि
ष्ठोध्यप्रदोर्चितः व्राह्मे सुदर्शनस्तथादे
वःश्यामवर्णोमहाद्युतिः वामपार्श्वेग
दाचक्रेरेखेचैवतुदक्षिणे व्राह्मेच च
क्राकारेणपंक्तिः सापद्मरेखामयीभवे
त सुसुदर्शनइत्येवंख्यातः पूजाफलप्र
दःदामोदरस्तथास्थूलोमध्येचक्रंप्रति
ष्ठितं दूर्वाभंद्वारिसंकीर्णंपीनारेखा
न्वितोवच पाप्रेचउपर्यधश्चक्रेद्वेना॥
तिदीर्घमुखेविलं मध्येचरेखालंचेका
सचदामोदरस्मृतः अन्यत्रचस्थूलोदा
मोदरोऽन्नेपः सूक्ष्मरंध्रोभवेत्तुपः चक्रेच
मध्यदेशस्थेपूजितःसमुखःसदानाना
वर्णोह्यनंताख्यो नागभोगेनचिन्हितः
अनेकचक्रसंभिन्नाः सर्वकामफलप्र
दः पाप्नेव अनेचक्रोवहुभिश्चिन्हैरणु

पत्लाक्षितः अनंतः सतु विज्ञेयः सर्वपूजाफ।
लप्रदः ब्राह्मे बिंदु क्षुद्रिश्च सुसवी सुपस्मोर्द्धे ह
श्यते मुखं पुरुषोत्तमः सविज्ञेयो भुक्तिमुक्ति
फलप्रदः दृश्यते शिखरे लिंगं शालिग्रामस
मुद्भवं तस्य योगेश्वरो नाम ब्रह्महत्यां व्यपो
हति आरक्तं पद्मनाभाख्यं पंकजच्छत्रसं
युतं तुलस्या पूजयेन्नित्यं दरिद्रत्वविखरो भ
वेत् चंद्राकृतिहिरण्याख्यं रश्मिज्वालाविनिर्दि
ष्टेत् सुवर्णरेखाबहुलं स्फटिककृतिशोभि
तं किंचयच्चे वज्रकीटोद्भवा रेखाः पंक्तीभू
ताश्चपत्रवे शालग्रामशिलायां सा विष्णुपं
जरसंज्ञिता नागवल्कुंडली भूतरेखा पंक्तिः
सशोषकः पश्चाकारं तु पंक्ती द्वे मध्ये यंवाच
रेखिकागरुडः सतु विज्ञेयः चतुश्चक्रो जना
र्दनः चतुश्चक्रः सूक्ष्मद्वारो वनमालांकितो
हरः लक्ष्मीनारायणः श्रीमान् भुक्तिमुक्ति-
फलप्रदः अर्द्धचंद्राकृतिर्देवो हृषीकेशस्तु
दाहृतः नमर्च्यतलमतो ल्वर्गं विषयांश्चसमी

हितान् वामपार्श्वे समे चक्रे कृष्णवर्णः स
विंदुकः लक्ष्मीनरसिंहो विख्यातो भुक्तिमु
क्तिफलप्रदः त्रिविक्रमस्तथा देवः श्यामव
र्णो महाकृतिः वामपार्श्वे तथा चक्रे रेखा
वैव तु दक्षिणे प्रदक्षिणावर्तकृत वनमा
लाविभूषिता या शिला कृष्णसंज्ञा सा धन
धान्यसुखप्रदा चतुरस्त्रोपयत्र दृश्यंते रेखा
पार्श्वसमीपगाः द्वे चक्रे मध्यदेशे तु सा शि
ला तु चतुर्मुखेति एतल्लक्षणयुक्तास्तु शा
लग्रामशिलाः शुभः यस्त्रनास्वपि सूक्ष्मा
स्थूलाः प्रशस्तनराः स्मृताः यथा च श्रीभग
वत्स्वसंवादिनैवैव यथा यथा शिला सू
स्यामहत्पुण्यं तथा तथा तस्मात्तां पूजये
न्नित्यं धर्मकामार्थसिद्धये तत्राप्यामल
की तुल्या सूक्ष्मा चातिवया भवेत् तस्यामे
वसदा वत्सन् श्रिया सह माम्यहं अथ श्री
शालग्रामशिलामहात्म्ये यः [illegible]पाद्ये
माघमाहात्म्ये यः पूजयेद्धरिं चक्रे शाल

ग्रामशिलोद्भवे एजमूपसहस्रेणतेनेहंप्री
तिवासरं यदामनान्तिवेदांताब्रह्मनिर्गुण
मच्युतं तत्प्रसादोभवेन्नृणांशालग्रामशि
लार्चनात् महाकाहस्थितोवान्हिमेध्यमा
नःप्रकाशते अपिपापसमाचाराःकर्मण्यन
धिकारिणःशालग्रामार्चकावैष्णवनैवयांति
यमालयं नतथारमतेलक्ष्मीनतथास्वपुरे
हरिःशालग्रामशिलाचक्रेयथासमरतेसदा
अग्निहोत्रंहुतंतेनदत्तापृथ्वीससागरा येना
र्चितोहरिश्चक्रेशालग्रामशिलोद्भवे कामे
क्रोधेमदेलोभेव्याप्तोयोत्रनराधमःसोवि
यातिहरेर्लोकंशालग्रामशिलार्चनात् यः
पूजयतिगोविंदंशालग्रामेसदानरःआभू
तसंप्लवंयावन्नसप्रच्यवतेदिवः१ विनाक्षा
मीथैर्विनादानैर्विनायज्ञैर्विनामखैःमुक्तिं
यातिनरोवैष्णवशालग्रामशिलार्चनात् न
रकंगमेवासंचातिर्यक्कृमियोनिकं नया
तिवैष्णवपापोयिशालग्रामेच्युतार्चकःदीक्षा

शा०
१६४

विधानमंत्रज्ञश्चक्रेयोबलिमाहात्म्यं संयाति
वैष्णवंधामसत्यंसत्यंमयोदितं नैवेद्यैर्वि
विधैःपुष्पैर्धूपदीपैर्विलेपनैःगीतवादित्र
स्तैश्चशालग्रामशिलार्चनं कुरुतेमानवो
यस्तुकलौभक्तिपरायणः कल्पकोटिसहस्रा
णिनिवसेत्सन्निधौहरे लिंगैस्तुकोटिभिर्दृ
ष्टैर्यत्फलंपूजितैस्तुतैः शालग्रामशिलाया
स्तुएकेनापीहतत्फलं शालग्रामशिलारूपे
यत्रतिष्ठतिकेशवः तत्रदेवासुरायक्षाभुव
नानिचतुर्दश शालग्रामशिलायांतुयःश्रा
द्धंकुरुतेनरः पितरस्तस्यतिष्ठंतितृप्ताःक०
ल्पशतंदिवि शालग्रामसमीपेतुक्रोशमा
त्रसमंततः कीकटेपिमृतोयातिवैकुंठभ
वनंनरः शालग्रामशिलाचक्रंयोदद्याद्दा
नमुत्तमं भूचक्रंतेनदत्तंस्यात्सशैलवन
काननं स्कांदेकार्तिकमाहात्म्ये श्रीशिव
स्कंदसंवादे शालग्रामसमीपेतुक्रोशमा
त्रंसमंततःशिलायांतुत्रैलोक्यंसचराचरं

मयासह महासेन लीनं तिष्ठन्ति सर्वदा दृष्ट्वा
प्रणमिता येन स्नापिता पूजिता नया यज्ञ।
कोटिसमं पुण्यं गवां कोटिफलं भवेत् काम
सक्तोपियो नित्यं भक्तिभावविवर्जितः शाल
ग्रामशिलां पुत्र संपूज्य सेवाच्युतो भवेत् शाल
ग्रामशिलाबिंबं हत्याकोटिविनाशनं स्मृतं
संकीर्तितं ध्यानं पूजितं च नमस्कृतं शालग्रा
मशिला दृष्ट्वा यान्ति पापान्यनेकशः सिंहं दृष्ट्वा
यथा यान्ति वने मृगगणा भयात् मनः करो
ति मनुजः शालग्रामशिलार्चने पापानि
विलयं यान्ति तमः सूर्योदये यथा कामस
क्तोपि वा क्रुद्धः शालग्रामशिलार्चनं भक्त्या वा
प्यभक्त्या कृत्वा मुक्तिमवाप्नुयात् नैव
स्ति तद्भयं नास्ति तथा मरणजन्मनोः पः क
ल्पाकुरुते विष्णोः शालिग्रामशिलाग्रतः
गीतं वाद्यैस्तथा स्तोत्रैः शालग्रामशिला
र्चनं कुरुते मानवो यस्तु कल्पौ भक्तिपरा
यणः कल्पकोटिसहस्राणि रमते विष्णु

शि॰
१६५

165

सर्वाणि शालग्रामेनमस्कारेभावेनापिनरैः
कृते भयंनैवकुर्वंत्तिनङ्कत्तापेनराभुवि
मद्भक्तिबलदर्पिष्ठामत्तप्रभुंननमंत्तिपेवा
सुदेवं नत्तेज्ञेयामद्भक्ताःपापिनोहित्ता शा
लग्रामशिलायांतुसदापुत्रवसाम्यहं द
नंदेवेनतुष्टेनस्वस्थानेममभक्तितःपद्म
कोटिसहस्रैस्तुपूजितेमपियत्फलं तत्फ
लंकोटिगुणितं शालग्रामशिलार्चने पू
जितोहंनतैर्मर्त्यैर्नमितोहंनतैर्नतैःनकृ
तंमर्त्यलोकेयैःशालिग्रामशिलार्चनं
शालिग्रामशिलाग्रेतुयःकरोतिममार्च
नं तेनार्चितोहंसततंयुगानामेकसप्त
तिःकिमर्चितैर्लिंगदानैर्विष्णुभुक्तिवि
वर्जिते शालग्रामशिलाबिंबनार्चिते
यदिपुत्रकृष्णनैर्हेममनैवेद्यंपुत्रपुष्पंफ
लंजलं शालग्रामशिलालग्नं सर्वंया
तिपवित्रतां योहिमाहेश्वरोभूत्वावैष्ण
वंलिंगमुत्तमं द्वेष्टिवैयातिनरकंपाव

ड्डिग्रस्थश्चतुर्दश्यां सकृदभ्यर्चितो विबे शालग्रा
मसमुद्भवे मुक्तिं प्रयांति मनुजा नूनं सांख्येन
वर्जिताः मल्लिंगैः कोटिभिर्दृष्टैर्यत्फलं पू
जितैस्तु तैः शालग्रामशिलायां तु एकेनापि
हि तद्भवेत् तस्माद्यत्नात्र मद्भक्तैः प्रीत्यर्थं म
म पुत्रक कर्तव्यं सततं भक्त्या शालग्रामशि
लार्चनं शालग्रामशिलारूपी यत्र तिष्ठति
केशवः तत्र देवासुरा यक्षा भुवनानि चतुर्द
श शालग्रामशिलाग्रे तु सकृत्संडेन तापि
ताः वसंति पितरस्तस्य न संख्या तत्र विद्यते
प्रमाणमस्ति सर्वस्य सुकृतस्येह हि पुत्रक फ
लप्रमाणहीनं तु शालग्रामशिलार्चने यो
ददाति शिलां विप्रो शालग्रामसमुद्भवां वि
प्राय विष्णुभक्ताय तेनेष्टं बहुभिर्मखैः मा।
नुष्यं दुर्लभं लोके शालग्रामोद्भवा शिला
प्राप्यते न विना पुण्यैः कलिकाले विशेष
तः स धन्यः पुरुषो लोके सफलं तस्य जी।
वितं शालग्रामशिलाशुद्धा गृहे यस्य च

शि० १
१६६

160

पूजितास्सन्नियम्येंद्रियग्रामंशालग्रामशि
लार्चनं यः कुर्यान्मानवोभक्त्यासजातिपर
मंपदं भक्त्यावायदिवाभक्त्यायः करोतिस
पुण्यभाक् द्वेषेणापिकलोभेनदंभेनकपटे
नवा शालग्रामोद्भवंदेवंदृष्ट्वापापात्प्रमुच्य
ते अशुचिर्वादुराचारः सत्यशौचविवर्जि
तः शालग्रामशिलांस्पृष्ट्वासद्यएवशुचि
र्भवेत् तिलप्रस्थशतंभक्त्यायोदद्यात्दिने
दिने तत्फलंसमवाप्नोति शालग्रामशि
लार्चने पत्रंपुष्पंफलंमूलंतोयंदूर्वाक्ष
ताः सुत जायतेमेरुणातुल्यंशालग्रामशि
लार्पितं विधिहीनोपियः कुर्यात्क्रियामं
त्रविवर्जितः चक्रपूजामवाप्नोतिसम्यक्
शास्त्रोदितंफलं नतत्रैवान्यत्रस्कंधेधृत्वा
नुपोध्यानंवहेत्तशैलनायकं तेनोक्तंत्रभु
वंसर्वंत्रिलोकंसचराचरं ब्रह्महत्यादिकं
पापंयत्किंचित्कुरुतेनरः तत्सर्वंनिर्दह
त्याशुशालग्रामशिलार्चनं नपूजनंन

मंत्राश्चनजपोनचभावना। नस्तुतिर्नोपि
चारश्च शालग्रामशिलार्चने शालग्राम
शिलायत्रतत्तीर्थंजोजनत्रयं तत्रदानं
चहोमंचसर्वंकोटिगुणंभवेत् शालग्रा
मशिलायांतुयः श्राद्धंकुरुतेनरः पित्त
रस्तस्यतिष्ठंतितृप्ताः कल्पशतंदिवि
शालग्रामसमीपेतुक्रोशमेत्रंसमंततः
कीकटेपिमृतोयातिवैकुंठभवनंनरः शा
लग्रामशिलाचक्रंयोदद्याद्दानमुत्तमंभु
चक्रंतेनदत्तंस्यात् सशैलवनकाननं
गरुडपुराणे तिष्ठंतिनित्यंपितरोमनु
ष्यास्तीर्थानिगंगागयपुष्कराणि यत्रा
श्वमेधाद्यपिपुण्यशैलाश्चक्रांकिताय
स्यवसंतिगेहे पाद्मेकार्त्तिमाहात्म्ये य
मश्चकेपासंवादे शालग्रामशिलायांतु
येनरैः पूजितोहरिः संशोध्यतेषांपापा
निमुक्तयेविद्धिदोभवेत् कार्त्तिकेमथु
रायांतुसारूप्यंदिशतोहरिः शालग्राम

शिलायांवैपितृनुद्दिश्यपूजितोः कृतः
समुद्धरेत्तस्यापितृन्नेतासलोकतांव्र
ह्मणारुद्रीयेवयत्रध्वजोपाख्यानांतेः
शालग्रामशिलारूपीयत्रतिष्ठतिकेश
वः न बाधंतेसुरास्तत्रभूतवेतालकाद
यः शालग्रामशिलायत्रतत्तीर्थंतत्तपोवनं
शतंवापूजिताभक्त्यानरधिकंफलं अ
थातासांवाहुल्येफलविशेषः पाद्मेमाघ
महात्म्येदेवदूतविकुंडलसंवादे शाल
ग्रामायुगाः पूज्यायुगेषुद्वितयंनहि अ
युग्मानैवपूज्यंतेविषमेष्वेकएवहि शि
लाद्वादशभोवैश्यशालग्रामसमुद्भवा
विधिवत्पूजितायेन तस्यपुण्यंवदामि
ते कोटिद्वादशलिंगैस्तुपूजितैः स्वर्णप
कजैः यत्स्याद्द्वादशकल्पेषुदिनेनैकेन
तद्भवेत् यः पुनः पूजयेद्भक्त्या शालग्रा
मशिलाशतं तत्फलंनैवशक्तोहंवक्तुं
कल्पशतैरपीत्याद्यास्तुविस्तारः इति

स्यंमाहात्म्यंच अत्रकेचित्शालग्रामे ।
विष्णोर्नावाहनंकार्यमितिवदंति तत्रप्र
माणंचिंत्यं वस्तुतस्तुस्कंदपुराणादिदर्शि
नाह्यावाहनमवश्यंकार्यमितीप्रतीयतेय
थास्कंदपुराणेविप्रः पूर्वंनिजेदेहेस्मत्तु ।
क्षेननसेद्बुधः ततस्तुप्रतिमायांचशाल
ग्रामेविशेषतः क्रमेणैवततःकुर्यात्स्वा
द्वावाहनादिकं आवाहयेच्चपुरतोध्यान
सेव्यंद्विजोत्तमेति अतएवावाहनाद्युद्वा
सनांतमर्चनमभिधायोक्तंबोधायनेन
शालग्रामप्रतिमास्वप्स्वावाहनवि
सर्जनमिति तथात्रैलोक्यसंमोहनतंत्रे
पि शालग्रामइस्मुपक्रम्यविसर्जनांता
पूजोक्ता अत्रशालग्रामशिलायांतुप्र
तिष्ठांनैवकारयेदितिप्रतिष्ठामात्रनिषे
धादावाहनमवश्यंविष्णोरन्यदेवतानां
चापिरुद्धमिति आवाह्यचौदेषुस्थाप्य
मस्तांगमांस्त्रपूजयेदितिभागवतेपिम

शि॰
१६८

भगवन्नामद्वयमभिधानात् आदिपदे
नशालग्रामपंचायत्योग्रहणं आवाह
नस्वरूपमुक्तं सिद्धांतशेखरे स्वतएवाभि
पूर्णस्यतत्वस्येहार्चनादिषु सान्निध्यसंमु
खीभावस्तदावाहनमिष्यते इतितात्प
र्यार्थमाह शारदातिलके मूलमंत्रंस
मुच्चार्य सुषुम्नावर्त्मनासुधीः आनीयतेज
स्वस्थानान्नासिकारंध्रनिर्गतं करस्थ।
मातृकांभोजेचैतन्यंपुष्पसंचयेसंयोज्य
ब्रह्मरंध्रेणमूर्तावावाहयेत्सुधीः सुषुम्ना
वर्त्मनाब्रह्मरंध्रेणदक्षिणनासारंध्रेण
निर्गतमिति गरुडपुराणे आगच्छेतिप्र
योगेणमूलमंत्रेणशंकरः आवाहनं
प्रकर्तव्यमितिनृसिंहपुराणे आगच्छन
रसिंहेति सारसंग्रहे आवाहनंस्थापनं
चसान्निध्यापनमेवच संनिरोधनमि
त्युक्तं संमुखीकरणंततः अथावगुंठ
नंप्रोक्तंसकलीकरणंततः अमृतीक

रणंदेवपरमीकरणंतथा विधायस्वस्व
मुद्राभिः प्राणस्थापनमाचरेत् सकली
करणस्वरूपंच सिद्धान्तशेखरे अपि।
भिन्नस्वभावानांपदाभिन्नप्रयोजनं अं
गानामंगिनासाद्धं सकलीकरणंविद्
मिती श्रीकुलार्णवे पीठेदेवंप्रतिष्ठा
प्यसकलीकरणंमंत्रवित् मूलमंत्रेण
दीपन्यंमालिन्याचोदकेनच प्रियांसंप्रो
क्षयेद्विद्वान्देवशुद्धिरियंप्रिये पंचशुद्धिं
विधायेत्थंपश्चात्पूजनमारभेत् सापूजा
सफलादेविचान्यथानिष्फलाभवेत् त
थाः वाग्भवंवदयुग्मांतेवाग्वादिनिचवा
ग्भवं कामराजततः। क्लिन्नेक्लेदिनि
क्लेदयेतिच महाक्षोभंकुरुयुगंकाम
राजमतः परं नातीयंमोक्षशाब्दांतेकु
रुयुग्मंवदेततः स्यान्तुस्यादपराचांतेम
न्त्रंपाद्धिरक्षरैः दीपनीमनुरित्युक्तः स
र्वसिद्धिकरः प्रियेचकारात्कुरुयुग्मांतेता।

त्रि॰ १६९

१६४

तीयं तदनु पराप्रासादबीजमित्यर्थः सप्त-
त्रिंशदक्षरइत्युक्तेः वाग्भिचकामराजता
तीयंबालाविद्यापाएव सात्वग्रेवाक्ष्यंते
पराप्रसादबीजंतुपुरस्तात्प्रयोगस्यैवमं
त्रस्यांतेइत्युक्तेः तथा सकलीकरणन।
प्राणांस्तदीयानीन्द्रियाणिच प्रतिष्ठाप्या
र्चयेदेवमन्यथानिष्फलंभवेत् अत्रके
चित् तस्मिन्प्राणप्रतिष्ठांतुप्रतिमापू
जनेऽरते नक्वचितुबुधःकुर्यात्कल्याम
त्युमवाप्नुयात् इत्युत्तरतंत्रवचनात्प्रा
णप्रतिष्ठानकार्येत्याहुः तन्न तस्यव-
चनस्यावाहनादिरहितस्यकेवलस्यं-
डिलादेपूजनविषयत्वात् अतएवो
क्तंतत्रैव प्रतिमापूजनादन्तइतिप्रति
मामूर्तिः तस्यांमंत्रमय्यामपितथात्वा
त अन्यथाकथंसकलीकरणमिति
सारसंग्रहे मुद्राः प्रदर्शयेविधिवत्तुपचा
रान्प्रकल्पयेत् मुद्राः तत्कल्पोरक्ता

नात्वग्रेवक्ष्यंते प्रपंचसारे आसनस्वाग
तेसार्घ्यपाद्यसाचमनीयके मधुपर्काच
मस्नानमवसनाभरणानिच सुगंधसुमनो
धूपदीपनैवेद्यवंदनाः प्रयोजयेद्देवना।
यामुपचारांस्तुषोडश अर्घ्यपाद्यसाचम
नेमधुपर्काचमान्यपि गंधादयोनिवेद्यां
ताउपचारादशक्रमात् गंधादयोनिवेद्यां
तापूजापंचोपचारिका सपर्यात्रिविधा
प्रोक्तातासामेकतमांश्रयेत् अत्रपंचो
पचारपूजापक्षे अर्घ्यादिपात्रस्थापनंना
स्तिप्रयोजनाभावात् भैरवीतंत्रे एकैक
स्यांततोमंत्रीप्रणम्यनुमिवेदयेत् तन्नि
वेदनप्रकारमाह नारदपंचरात्रे प्रणवं
तेत्रिधाकृत्वाप्राणंव्योमविभूषितं इ
दमिदमिदंपश्चात्पदंदद्यात्षडक्षरंग
हाणचततः पंचदशाक्षरः योज्यः सर्वोप
चारेःषुपाद्यादिषुसदैवहिः प्राणंहका
रः व्योमबिंदुः सारसंग्रहे: मूलेनैवास

शि।
१७०

नं स्थानेन स्वागतमीरयेत् ततोर्घंमू-
र्ध्नि दद्यात् स्वाहामंत्रेण मंत्रवित् पाद्यं च
देवतापादस्तु तदापायं प्रकल्पयेत् स्वधा
दाचमनं वक्त्रे देवतायाः सुधाणुना सुधा
मंत्रेण दद्याच्च मधुपर्कं मुखांबुजे अत्र
वैदिको मिश्रितो वापि विप्रादीनां विधी-
यते तांत्रिको विप्रभक्तस्य शूद्रस्यापि प्र-
कीर्तित इति पद्मपुराणवचनात् ब्र-
ह्मणक्षत्रियवैश्यैर्गणेशादिपंचदेवता-
नां तत्तद्वैदिकमंत्रेण प्रथमं पूजां कृत्वा
ततस्तांत्रिकमंत्रेण पूज्या कार्या पश्चात्
तद्वैदिकमंत्रानेन तत्तांत्रिकमंत्रं कृत्वा
वा पूजा कार्या केवलं तांत्रिकयजन-
स्य शूद्रविषयत्वात् उक्तवचनात् तत्र
वैदिकमंत्रास्तु गणानां त्वेति गणपतेः प्र
गौरीर्मिमायेति भुवनेश्वर्याः दिगारीभैर
नो पद्मागिरिभरण्याः श्रीसूक्तं लक्ष्म्याः
जातवेदसे सुनवाम सम इति दुर्गायाः वि

स्तुः पुरुषसूक्तं रवेराकृष्णेनेति शिवस्य
नामः शंभवायेति त्र्यंबकं यजामहइति
गणानांत्वेति मंत्रस्य गत्समद ऋषि
त्रिष्टुप् छंदः ब्रह्मणस्पतिर्गणपति देवता
गौरीर्मिमायेति दीर्घतमा ऋषि जगती विश्वे
देवा आकृष्णेनेति हिरण्यस्तुपस्त्रिष्टु
प्सविता अथोपचाराः तत्रादावास
नानि उक्त रत्नत्रैपीठ्यं पुष्पादिरचितं
कुशसूत्रादिसंयुतं अतिप्रीतिकरं द
द्याममाप्यन्यस्य भैरव पद्मदारुस
मुद्भूतं मासनं चाव्रणं शुभं अन्यदारु
मंबचापिदद्यादासनमुत्तमं संकट
कक्षीरयुतं दारुसारविवर्जितं बैज।
पितृश्मशानसंभूतं वर्जं। पित्वाविभी
तकं चैत्यस्नाम प्रसिद्धिहेतुभूतो महा
वृक्षः दाहमयासने विशेषमाह रुद्र
यामले शांडिल्यभद्रसारस्य चासनं
हस्तमात्रकं सप्तांगुलोच्छ्रितं दद्यात्।

द्विष्टरं वा षिचक्षणः शांडिल्यो विल्वैः
विल्वेषु शांडिल्य शैलूषौ मालूर पूः श्रीफ
लावपीत्यमरः भद्रसारस्यंदनः भद्रसा
रो मल्लपजो भद्रश्रीश्चंदनो। स्त्रियामित्य
मरकोशात्। विष्टरो भद्रमुष्टिः डामरे
सप्तविंशतिदर्भाणां वेरायग्रेग्रंथिभू।
षिता। विष्टरे सर्वपत्रेषु लक्षणं परिकी
र्तितमिति। यद्वा विष्टरश्च स्वासनमा
त्रवाची। विष्टरो विटपी दर्भमुष्टिः पीठ
घमासनमिति हि कोशः। उत्तरतंत्रेः के
शजं वा ऽन्कलं शाल्तुणवा स्त्रमेतद्द्वयं
स्मृतं रोमजं केवलं चैव वादरं च चतु
ष्टयं वा त्वेयु कंवलं श्रेष्ठमासनं देव
तुष्टये वा स्त्रमासनं चतुष्टयमित्यर्थः
वादरं कार्पासं कार्पासं वादरं च तदि
ति विश्वप्रकाशकोशात्। तथा सिंह
व्याघ्रतरक्षूणां छागस्य माहिषस्य च
गजानां तुरगाणां च वृकस्य मारस्य च

मेण: दूकचरोमजं श्रेष्ठं दारवं चंदनो
द्भवं एकवं रंकुनामामृग: काश्मीरदे
शप्रसिद्ध: यत्तद्रोमजं पामरीतिलोके
प्रसिद्ध: कंबलविशेष: तथा पद्मासनं
कुशमयं तदासनमनुत्तमं योगपीठस्य
सदृशं नासनं कौशमुच्यते तथा: सर्वे
षां तेजसानां चाप्यासनं श्रेष्ठमुच्यते व
र्जयित्वा लोहमयं कांस्यसीसकमेव चे
ति सारसंग्रहे देवस्य वामभागे तु दर्घा
मूलेन चासनं पीठं दारुमयं वा स्वं वा
मे कौशं वा तैजसं आसनं चाद्विधं प्रोक्त
मिति अत: परमर्घ्यदानं तच्च देवस्य शि
रोहिण्मये वा शिरसि देयं तच्च पितृर्घ्य:–
व्याप्त: विप्रकरे दानादिति वाक्यं तस्य
पितृणां शिरोहिरण्मये व तत्र दानादिति
सोमशंभु: आगताय तथार्घ्यपात्रात्तु
मासनगापच पूजान्तोगं तु कामापद
पाद्यं विचक्षण: आगतेत्वानका

लेचनेवेद्योपक्रमेतथा पापस्यापिस
मुद्दिष्टः समयस्त्वविधोबुधैः तणीपागो
सुगंधतैलैरभ्यज्यसुगंधामलकादि
भिः उद्वर्तनंविधायाथस्नापयित्वोष्ण
वारिणा गंधोदकैश्चमूलेनपयाशास्त्र
भिषेचयेत् महाभिषेकंसर्वत्रशैरवैनै
वप्रकल्पयेत् सर्वत्रैवप्रशस्तोऽजवः ॥
शिवः सूर्यार्चनंविनाः ज्ञानमालायां ।
पाद्येचमधुपर्केचस्नानेवस्त्रोपवीतयो
भोजनेवाचमंदद्यादितियामले पीतं
कौशेयवसनंविष्णुप्रीत्यैप्रकल्पितंर
क्तंशक्त्यर्केविघ्नानांशिवस्यचशितं ।
प्रियं मलहीनंतथाछिद्रंक्षौमंकार्पा
समेवचा मंत्रतंत्रप्रकाशे तैलादिदू
षितानाद्रोगः सच्छिद्राद्युस्यताभवेत्जी
र्णंदरिताकर्तुर्मलिनात्कीर्तिहीनता
कालिकापुराणेनिर्दशंमलिनं जी ।
र्णंछिन्नंगात्रावलंबितं परकीयं ।

वारखुद्धसूचीविघ्नंतथासितं ञसके
शामधौतंच श्लेष्ममूत्रादिदूषितं प्रश
नेदेवतानाम्यष्टादेवेपिक्रमेचकर्मणि वर्ज
येत्सोपयोगेच यज्ञादावुपयोजने सार
मंग्रहे यज्ञोपवीतंदत्वाथभूषणानिस
मर्पयेत् नानिनानाविधानिस्युर्मुकुटा
दिप्रभेदतः स्त्रीपुंप्रभेदतश्चापिविज्ञेया
निवक्षणेः योगिनीतंत्रे गंधःपुष्पंतथा
धूपोदीपोनैवेद्यमेवच यस्यप्रदीयते
वस्त्रमलंकारादिकांचनं तेषांदेवत
मूर्ध्नार्पयित्वाप्रोक्षणपूजने अस्य
मूलमंत्रेणप्रतिनाम्नानिवेदयेत् व
रुणस्यतुबीजेनतेषांप्रोक्षणमाचरे
त् वस्त्रस्यदेवतालक्ष्मीरथवापिप्र
जापतिः सुवर्णेचाग्निदेवत्यंरजतंच
रुद्रदेवतं हीरकेवारुणंस्वर्णंरसानांप
ष्टितथा जतस्यवरुणोदेवःपेयानां
वरुणस्तथा कुसरस्यरमादेवीपर

शि॰१
२०३

मान्नस्यवैवहि घृतप्रदीपकेविष्णुस्तैल
योरोवनस्पतिःगंधर्वश्चतथाधूपोह्या
ज्यंचैवग्निदैवतं मधुवैवारुणंज्ञेयंद
धिक्षीरंचवैष्णवं वानस्पत्यंतथापुष्पं
वैष्णवोगंधईरितः माल्यायाश्चतथादु
र्गासर्वदाविष्णुदैवतं अत्रपूजनएव
दैवतोवारः तेषांदैवतमुच्चार्यपूजयेत्नु
विचक्षणइतिस्वयमभिधानात् उत्स
र्गस्तुमूलमंत्रेण उद्देनमूलमंत्रेणत
थोत्सर्गानिवेदने इतिस्वयमभिधाना
त् कालिकापुराणे चूर्णकृतोवाघृष्टो
वादाहकर्षिलएववारसः संमर्दजोवा
पिप्राण्यंगोद्भवएवच गंधपंचविधः
प्रोक्तोदेवानांप्रीतिदायकः गंधचूर्णं
गंधपत्रंचूर्णंसुमनसस्तथा प्रशस्तः
गंधपुष्पाणांपात्रचूर्णानियानिचता
निगंधाह्वहानिस्युः स्मूर्णजाःप्रथमाः
स्मृताः घृष्टोमलयजोगंधःसरल

श्चनमेरूण: अगरुप्रभृति श्चैवघृष्टपंक
प्रदीयते घृष्टेन घृष्टोगंधोयं द्वितीय: प
रिकीर्तित: शारदातिलके गंधश्चंदन
कस्तूरीकाल्कागुरुभिरीरित: तथादेव
दारुवंगरुब्रह्मसानसारानुवंदनात् प्रि
यादीनोचयोस्यधाग्रह्यते दाहजोरस:
मदाहकर्षितोगंधस्ततीय: परिकीर्ति
त: सुगंधकरवीराद्यंगंधत्वनिकात्
या सुगंधान्यरसो यो सो निष्पीड्यपरि
गृह्यते समंमर्दोद्भवोगंध: संमर्दजइती
र्यते मृगनाभिसमुद्भूतस्तत्को शोद्भव:
एववा गंध: प्राण्यंगंध: प्रोक्तो मोददं:
स्वर्गवासिनां मंत्रतंत्रे पुष्पंपंचविधं
प्रोक्तं मुनिभिनीरदादिभि: परापरोत्त
मंचैवमध्यमंचनपाधमं सौवर्णंपर
मित्युक्तमपरंचित्रवस्त्रजं वृक्षगुल्म
लतापुष्पमुत्तमंपरिकीर्तितं अधमं
पत्रतोयादिमध्यमंतुफलास्मकं उ

शि॰ १
१७८

174

स्तत्वं न क्रियायोग्यं सदा योग्यं परापरे ए
पुष्पउत्स्वत्वं पदेव मोक्तं तत्तस्तु नः क्रिया
योग्यं न भवतीत्यर्थः परापरे परं सौवर्णं
अपरं वस्त्रेति चा उत्सङ्गे चेत्तसदा योग्यं भ
वतः देवतोपरि सदा धार्यं इत्यर्थः तयो
रेकतरमप्युत्सत्वं यदि भवति तदा तत्तु
नः क्रियायोग्यं देवपूजायोग्यं न भवती
त्यर्थः तदुक्तं स्नानार्णवे पुष्पैः पर्युषितै
र्देवि नार्चयेत्स्वर्णजैरपि निर्माल्यभू
तैः कुसुमैरुच्छिष्टैः परमेश्वरी तानि
र्माल्यभूतैः उत्सङ्गैः दत्तैरितियावत्
उच्छिष्टैः पूजावशिष्टैः उत्तमपुष्पाणि
मारसंग्रहे शुक्लाकुसुमा च तुलसी शु
क्लं रक्तं च पंकजं केतकीपुष्पं जा
तीद्वयं हिहयारिजं पुष्पाणां दश कंहे
तत्तषशास्त्रपरिकीर्तितं रक्तनीलोत्पल
शास्तमल्लिकाकुमुदं तथा कुमुदं क
ल्हारकं चैव मुंदारं तगरं पुन अर्जुनं

किंशुकं रक्तमंदारं नागचंपकं अशोक
बिल्वपुष्पाणि पाटलीनव मल्लिका
पंचकं कर्णिकारं च पारिजातनतस्तु च
शतबगोडुबं पुष्पं कोरंटकुसुमानि च
इत्यादीनि सुपुष्पाणि गंधवंति लसंति
च ततन्मंत्रविधानेषु विहितानि सम
र्पयेत् स्नानानि चांगलग्नानि शीर्णानि
क्ष्मागतानि च इत्यादीनि सुपुष्पाणि गं
धवंति लसंति च ततन्मंत्रविधानेषु वि
हितानि समर्पयेत् स्नानानि चांगलग्ना
नि शीर्णानि क्ष्मागतानि च यानि पर्युषि
तानि स्युः कृमिभिर्भक्षितानि च कोर
काणि च दुष्टानि समाघ्रातानि नार्पये
त् मंत्रतंत्रप्रकाशे पत्रेषु तुलसीश्रे ॥
ष्ठा बिल्वं दमनकं शुभं मरुकां देवक
ल्हारी विष्णुक्रांतानथैवच अपामार्गो
न्यग्रोधारीपत्री सुरभिसंज्ञका नागव
ल्लीदलं दूर्वा कुशा वत्रं न यामलं पत्रं

शि।
२७५

175

चागस्तिवृक्षस्यपुष्पंधात्रीदलंतथे
ति ज्ञानमालायां नाक्षत्रैरर्चयेविद्वं
ननुलस्यागणाधिपं नदूर्वयापजेद्दु
र्गांविल्वपत्रैर्दिवाकरं देवीनामर्कम
दाराब्रह्मित्तगरंतथा गणेशायवस्
र्यायरक्तपुष्पमतिप्रियं शिवेकुंदंमद
तीचंपूर्यांवंधूककेतके जयारक्तात्रि
सध्येद्द्सिंदूरंकुटजानिच मालतीपु
ष्पंरक्तहयारिवर्बरीस्रजेत् उग्रगंध
मगंधंवाक्रिमिकेशादिदूषितं युष्ट्र
पात्रपाणंगवासोभिःकुशितामनि
त्राानीतंनार्पयेच्छंभोःप्रमादाद्विदो
षकृत् कलिकाभिस्तथानेज्यंविना
चंपकपंकजैः नशुष्कैःपूजयेच्छंभुंप
त्रैःपुष्पैःफलैरपि स्वात्वानीतैःपर्युषि
तैर्याचितैःक्रुस्रवर्णके स्वयंनिका
शितैःपुष्पैःस्वपंचपत्तितैर्भुवि वा
जपेद्हतीपुष्पंकांचनारंकुरंटकं स

वैपुष्पैः महापूजाविहितैरपि कर्तव्यास
वेदेवानांभक्तिरेवात्रकारणं अत्रत्वा
त्वानीतैः मध्याह्नस्नानोत्तरमानीतै
रित्यर्थः अन्नरूस्नानादिशान्तः काली
नपूजांतत्प्रथमप्रहरकृत्यमुक्तानन्तः
पुष्पफलादीनामुपार्जनमाचरेत्।
इति द्वितीयप्रहरकृत्यत्वेननारदपंच
रात्रे पुष्पाहरणस्योक्तत्वात् तथा प
त्रंचायदिवापुष्पंफलंनेष्टमधोमुखं
दुःखदंतत्समाख्यातंयथोत्पन्नंतथा
र्पणं चित्तपूजासुसर्वासुनविरुद्धस्य
दूषणं अधोमुखार्पणनेष्टं पुष्पांज
लिविधौनतत् लक्षपूजासुसर्वासु
पुष्पमेकैकमर्पयेत् समुदायेनचेत्पू
जालक्षपुष्पार्पणंनतत् नपर्युषितं
दोषोस्तिजलजोत्पलचंपके तुलस्य
गस्त्यबकुलेबिल्वगंगाजलेतथा अ
त्रकेचित् उत्पलपदस्यनाजलप

शि॰
७६

१७६

देनकमलमात्रं ग्राह्यमिति वदंति न
नतुलस्यां विल्वपत्रे च जलजेषु च
सर्वशः न पर्युषितदोषोस्ति मालाः
कारगृहेष्विति भविष्यपुराणवच
नादिति सारसंग्रहे परारोपितवृक्षे
भ्यः पुष्पाण्यानीय चार्चयेत् अविज्ञा
पर्वतैर्यस्तु निष्फलं तस्य पूजनं स्ना
नमालायां फलेष्वामलकं श्रेष्ठं चार
रं तितिडीफलं दाडिमं मातुलुंगं वा
जंवीरं पनसोद्भवं कदलीचूतसंभू
ते श्रेष्ठं जंबूफलं तथा पजेदेतेः सदा
बिल्वपत्रैः पुष्पैः पत्रैरपि दिवसे श्रिव
सो स्तुलैः पुष्पैः पूजा तथा निशि पुष्पा
बमावेप्रवालैर्वा कारयेच्च नकोरकैः
अतः परमावरणपूजा तत्र पुष्पोप
चारांते सारसंग्रहेः मंत्रसंपुटितैर्वर्णै
मातृकायाः सबिंदुकैः क्रमेणगंधपु
ष्पार्घैर्देवस्यांगेषु समर्चयेत् तथांगम

चेयेद्देहे देवस्यापनुवितमः ज्ञानार्णवे
पित्वपांगमद्धयेद्देहेति पयवाहिन्या
मपि त्वपांगमर्चयेद्देहे न्यासस्थानेषु
मंत्रवित् इति शारदातिलके अंगादि
लोकपालांनंतयजेदावरणान्यपिः
केसरेष्वग्निकोणादि हृदयादीमिपूज
येत् नेत्रमग्नेरीशान्वस्त्रंध्यायेदथाथ
गदेवताः तुषारस्फाटिकश्यामलनील
कृष्णारुणाचिषः वराभयधारिण्यः
प्रधानतनवः स्त्रियः अंगादीतिविशेषा
नभिधाने लोकपालशब्देनतदस्त्रा
णामप्यादाने अत्राग्निकोणादीत्यादि
पदस्यक्रमग्राहित्वादग्निराक्षसवायव
शानकोणेष्वंगचतुष्टयंयजेदितिवद
त्ति तन्त्र अग्नीशासुरवायुव्यमध्यादि
क्ष्वंगपूजनमिति ज्ञानार्णवरक्षिणा
मूर्तिसंहितयोर्वचनात् हृदयंचाग्नि
दिग्भागे ईशान्यांचशिरोयजेत् शिखां

निर्ऋतिदिग्भागे व्यापव्येक कवचं तथा
अस्त्रमंत्रं तथा दिक्षु नेत्रमग्ने प्रपूजये
दिति दक्षिमूर्त्तिकल्पवचनात् वह्नौ
हृदयमीशान्यां शिरो नैरृते शिखां
वायौ वर्म पुरो नेत्रमस्त्रं दिक्षु चतुर्ष्व
पीति कपिलपंचरात्रवचनात् इत्था
हृदयमाग्नेय्यामीशान्यां च शिरो जनेत्
नैरृत्यां च शिखां पूज्य वायव्यां कवचं
यजेत् अग्रे चैव पुरतो नेत्रमस्त्रं दिक्षु स
मर्चयेदिति सोमशंभुवचनात् पूर्वया
म्यन्तरे विसो हृदयं विनिवेशयेत् शि
रः पूर्वोत्तरे दद्यात् शिखां पश्चिमदक्षिणे
पश्चिमोत्तरदिग्भागे कवचं विन्यसेद्धरेः
अन्तः ग्रे केसरोद्देशे नेत्रं दिक्ष्वस्त्रन्तथे
ति नारदपंचरात्रवचनाच्चेति अत्र व
र्णपूजास्य पुरः प्रवीप्रकल्पयेत् त
दादि परिवाराणां प्रादक्षिण्येन पूजन
मिति नारसिंहकल्पवचनात् पद्म र

भिमुखाद्देवाभिमुखतो दृष्टा प्राग्वादि
हरितोस्याः पूजाहोमादिकर्मस्थितिः
मारसंग्रहवचनात् यत्रैव भास्वानुदयं
प्रयाति प्राचीमिमां वेदविदो वदंति म
ध्ये तु सा पूजकपूज्ययोश्च सदागमज्ञै
स्ततं विचिंत्येति भैरवीतंत्रवचनाद्दे
वाग्नं प्राचीं परिकल्प तदनुसारेण यथा
दिकं कल्पयित्वांगानि पूजयेत् आवरण
देवताश्चैवमेव पूजयेदिति महाकपि
लपंचरात्रे शिरः प्रभृतिमंत्रेषु पूजायां
तु नमोंतता शिरोभिन्नेषु होमे स्वाहांत
ता भवेत् तथा चोक्तं प्रणवादौ त्यजेत्ता
रं स्वाहांते वान्हिवल्लभां वषडंते वषट्
स्याज्ज्यानमोंते च नमस्त्यजेदिति आव
रणदेवतास्तत्कल्पे वक्ष्यंते मालिनी
तंत्रे स्य स्वस्थाने स्वाभिमुखान् पूजये[illegible]
त्प्रोक्षणादिभिः अभिमुखान् देवस्यश्री
विद्यावरणपूजायां दक्षिणामूर्तिसहि

श्रि॰ १
१२८

तायां श्रीविद्यासंमुखीं स्मरेत् ॥ इत्युक्ते
न्त्यासिद्धेश्वरीतंत्रे ॥ अथार्घ्यस्य समा।
र्येश्च मार्तंडः स्वमरीचिभिः तद्वद्वेगे।
निजैर्देवी ध्यातव्याः स्वमरीचिभिः तू
र्णं यागे रेदेवीं ध्यात्वा तच्छरीरान्मपू
खनिकरं वन्हिः विभिः सत्पस्थौरीमूर्त्त
परिवारे विचिंतयेत् ॥ अथ प्रथमावरणं
त्वार्घं मूलमुच्चार्य मंत्रवित् संपूज्य देवं
संबोध्य वदेन्मंत्रमिमं ततः ॥ अभीष्टसि
द्धिं मे देहि शरणागतवत्सल भक्त्यास
मर्पये तुभ्यं प्रथमावरणार्चनं इति पु
ष्पांजलिं दत्वा प्रणमेद्भक्तिभक्तितः प्र
त्यावरणमेवं तु तत्तन्नाम्नां समर्चयेत्
इत्थमावरणं सम्यभ्यर्च्य मनुवित्तमः
अंते पजेल्लोकपालांस्तेषामस्त्राणि च
क्रमात् ॥ इंद्रं सुराधिपं पीतं वज्रहस्तं स
वाहनं ॥ अग्निं तेजोधिपं रक्तं शक्तिहस्तं
सुभूषणं ॥ यमं प्रेताधिपं कृष्णं दंडहस्तं

समर्चयेत्त रक्षोधिपं च निरृतिं खड्गह
स्तं सुप्रभं पाशहस्तं सुशुभ्रांगं वरुणं
यादसांपतिं वायुं प्राणाधिपं धूम्रमंकु
शाख्यं करं जजेत्त यक्षःपतिं कुबेरं च शु
ल्क वर्णं गदाकरं विद्याधिपं तथेशानं
स्वस्थं शूलकरं यजेत्त नागाधिपं तथा
नंतं गोरवं चक्रकरं यजेत्त लोकाधिपं
विधातारं रक्तं पद्मकरं यजेत्त ऐरावतं
तथा मेषं महिषं मनुपूरुषं मकरं मृग
मत्स्यौ वृषं च विपहंसकौ ईंद्रादिलो
कपालानां वाहनानि बिदुर्बुधाः वज्र
पत्तितानितां शक्तिदंडं खड्गं समर्चयेत्त ख
ड्गमाकाशसंकाशं पाशं विद्युन्निभं यजे
त् अंकुशं रक्तवर्णं च शुक्लवर्णं गदां
यजेत्त त्रिशूलं नीलवर्णं च यजेन्मंत्री
ततः परं रथांगं करवेदाभं पद्मं रक्तं स
मर्चयेत्त लोकपालायुधान्येवं क्रमे
परिपूजयेत्त पुनर्मूलं समुच्चार्य सांगा

शि॰ १७९

यसपरीक्षितं च कारणपदेवनो माध्यचतु
र्थ्यंतमुदीर्यं च नामः स्वर्चयेद्गंधपुष्प
धैः साधकस्त्रिधा ततो यजेद्धूपदीपा
नैवेद्यैः सुमनोहरैः प्रपंचसारे सगुग्गु
ल्वागुरुशीरसितान्यमधुचंदनैः सार
गारविनिर्मितैर्मंत्रीनेरछै: प्रधूपयेत्तशे
वागमे धूपभाजनमस्त्रेणप्रोक्षाभ्यर्च्य
हृदाणुना अस्त्रेणपूजितं घंटां वादय
पन्गुग्गुलुं दहेत् नारदपंचरात्रे आ
वाहनेऽर्घ्यं धूपे च पुष्पनैवेद्ययोजने नि
त्यमेवं प्रयुंजीत तन्मंत्रामंत्रिनामपि
च कारादीयपि नया पूजा कालेबिना
न्यत्र हितं नास्याः प्रबालनं नानपाव
बिना पूजां कारयेत्सिद्धिलक्षणः दघा
तारावसानेचगजध्वनिपदंततःमं
त्रमातःपदं चैवस्वाहाक्षरसमन्वितं
एकादशाक्षरो मंत्रो घंटायाः सर्वसि
द्धिदः २ उद्धारः सुगमः कालिकापुरा

णे कामतस्तु तथा धूपमग्नेवानन्तु दक्षि
णे नधूपं वितरेत्तु भूमौ नासनेन घंटेत
था पश्चात्तथा धारगतं कृत्वात्तं विनिसे
वेदयेत् मेदोमज्जासमाक्तान्न धूपानि
निवेदयेत् नपक्षधूपं वितरेन्माधवा
पकदाचनक्षायं धूपस्तु रात्रिर्तिलोके
प्रसिद्धिः विह्वः धूपार्पणे जीवजात्तामि।
ति प्रपंचसारे गोसर्पिषावात्तैलेनवा।
र्त्ताचलघुगर्भया दीपितं सुरभिं शुभं।
शुभ्रं दीपमुच्चैः प्रदीपयेत् वाशब्देनाम
योरामिश्रनत्वमुक्तं नामिश्रीकृत्य दद्यात्तु
दीपस्नेहान् घृतादिकान् कृत्वा मिश्रीकृ
तं स्नेहं त्वामिश्रं नरकं व्रजेत् इति काल
कापुराणवचनात् तूर्णापागे
पारावतस्त्वमाकारं दीपनेत्रादिदर्शयेत्
दक्षिणे सर्पिवा दीपं तिलत्तैलेन वामत
सिताविर्तिदक्षिणे तो रक्ताविर्तिस्तु वाम
तः कालिकापुराणे वक्षेपुदीपोदात्तव्यो

शि॰ नत्वभूमौ कदाचन कर्वस्तु पाद्यविना

१८० पयो दीपमुत्सृजेन्नरः सताघ्रतापेन

रकमाप्नोत्येवशान्तंसमाः रुद्रपामल्ले

नेवनिर्वापयेदीपंसाधकस्तु कदाच

न यस्तु निर्वापयेदीपंतस्यलक्ष्मीर्विन

शति कूष्मांडच्छेदिकानारीदीपनि।

र्वापकः पुमान् विधवा क्षयरोगस्त्व

भवेत्सप्तसुजन्मसु सनत्कुमारकल्पे

इत्थंस्तुत्वंसमभ्यर्च्य पंचावरणसंयुतं

कदलीफलसंयुक्तंपायसंविनिवेद

येत् सारसंग्रहे सघृतंपायसंपक्वंसुप

क्वंश्लक्ष्णयासह सर्करादधिसंयुक्तंसापू

पंशंसमोचकं सुसंस्कृत्याविधानेननै

वेद्यंतुसमर्पयेत् नानार्णवे शुद्धस्फ

टिकसंकाशंचंद्ररश्मिसमप्रभं तत्सं

स्नसुवर्णजेपात्रेचारुम होदनंप्रिये हिं

गुजीरमरीचाद्यैराद्यैकेरचितः शुभःव

टकः कुंकुमाकारः पायसंहेमसन्निभं

दुग्धमावर्तितं सम्यक् शर्करासारपूजि
ते कपिलाघृतसंयुक्तं मजेलवक्शो
भिमंडकाः शर्कराफाणिताश्चैवसूपंसु
स्नेहवंनघा नानाविधानिपेयानिव्यंज
नानिबहूनिच सारसंग्रहे निधायस्व
र्णेनिपात्रेसाधारंतत्रमंडले संस्थाप्यच
तुरस्रेचसंस्कुर्याच्छास्त्रमार्गतः अस्त्रमं
त्रेणसंप्रोक्ष्यचक्रमुद्राभिरक्षितं वायु
बीजेनसंशोष्यवह्निबीजेनतंदहेत् स्प
र्शान् दक्षकराग्रेणसुधाबीजेनमंत्रवित्
अमृतीकृत्यतत्सर्वं मूलमंत्रेणतत्पुनः
स्पर्शनकराभ्यांविधिवद्दृष्ट्वाभिमंत्रये
त् धेनुमुद्रांप्रदर्श्याथगंधपुष्पैः समर्च
येत् देवमभ्यर्च्यंकुर्यात्पुष्पांजलिमन
न्यधीहिमपात्रस्थितंदिव्यंपरमान्नंसु
संस्कृतं पंचधाषड्रसोपेतंगृहाणममम
सिद्धये मूलमंत्रंसमुच्चार्यस्वाहांतंजल
मर्पयेत् कराभ्यांतत्समुद्धृत्यपूजितंच

त्रि०
१८१

सुधात्मकं निवेद्यामिभवत्तेसानुगा
यजुषोणत्तत सर्वपूजामुत्तन्नानैवेद्य
स्यमनुस्त्वयं प्राणसंस्तस्ततथापानोव्या
नोदानमनुस्ततः समानोडि युत्ताः सर्वे
प्राणवाचाद्यादि नकाः पंचमंत्राभवंतीह
क्रमेणपरिकीर्तित्ताः प्राणादीनांसुद्य
नुवक्ष्यंते नैवेद्यसंस्कारस्तन्निवेद
नप्रकारश्चाग्रेप्रयोगेवक्ष्यते स्नाना
एवं संकल्पपरमेशान्यैनित्यहोम
विधिंचरेत संकल्पनैवेद्यं सारसंग्र
हे इत्येतुसंस्कृतेवन्हौदेवमावाह्यमंत्र
वित्त संपूज्यमूलमनुनापंचविंशति
माहुती हुनेदाज्यैनह विषातिलैर्वा
पायसैः शुभैः तंडुलैस्तिलमिश्रैर्वाप्य
पुष्पकैः अंगावरणदेवानामेकैकामा
हुतिंहुनेत उद्वास्यदेवंवन्हिंवपूजा
स्थानव्रजेत्ततः उपविश्यासनेमंत्रीद
द्यात्तभूतवलिंततः ईशानेमंडलंकृ

त्वासाधारंतत्रनिक्षिपेत् अन्नंचंजन
नीष्वंपात्रंपुष्पादिपूजितं ध्यात्वाभूता
निसंपूज्यततस्तेभ्योबलिंहरेत्तत्रबलि
मंत्रोवस्तुत्सर्गप्रकारश्चप्रयोगेवक्ष्य
ते उच्छिष्टपूजाचक्रे देवंस्वात्मनिवह्निं
चेति अग्निसंस्कारःप्रागेवदीक्षाप्रका
रणेभिहितःतत्रापिसंक्षेपप्रकारस्तुप्र
योगेवक्ष्यते वसिष्ठःअग्न्याधानादि
कंकर्मनित्यहोमेनविद्यतइति नारदी
ये पुनराचमनंदद्यात्करोद्वर्तनमेवच
पुनराचमनंतत्रापोशानंचकारयेत्
ष्ठंतच्छोधनारीन्युक्तानि प्रपंचसारे
पुनर्निवेद्यशुद्धत्यपुरोवत्परिपूज्यचसु
खवासादिकंदत्वेति तंत्रांतरे गंडूषा
दिनतोदत्वातांबूलादिनिवेदयेदि
ति तथानारायणीये सकर्पूरंचतां
बूलंदद्यात्रीराजनंतथा समर्प्यमु
कुटादीनिभूषणानिविचक्षणःश्री

दर्शयेत्तथादर्शं कल्पयेच्छत्रचामरेष्व
गस्त्यः कर्पूरखंडकस्तोगिनिस्तंनागवल्ली
दलैर्युतं सुधाविंदुसमायुक्तं पूगीफल
महरं तांबूलं रघुनाथाय दत्वा कामा।
नवाप्नुयात् सुधाविडंचूर्णं नीराजनः
माहसोमशंभु शिरस्यारोप्य देवस्यहू
र्वोक्षतपवित्रकमिति अत्र नीराजन
शब्देनारात्रिकमभ्युचते तत्रस्नानाव
र्णेवे आरात्रिकं ततः कुर्यात्सर्वकामा
र्थसिद्धये सौवर्णे राजते कांस्ये लोक
नेत्रमनोरमं कुंकुमेन लिखेत्पद्मंव
सुपत्रं वरानने दीपमेकं कर्णिकायांव
सुपत्रे दृढदीपकान् पवणोधूमरवित्ता
न्शर्करादुग्धसंयुतान् वलपांचित
शोभाभिः शोभितान् घृतपूरितानभ्र
मिमं जपन्ततो मंत्री रत्नैश्च पानतः परः
मूलमंत्रेण चाभ्यर्च्य ततश्चारात्रिकं।
कं चरेत् नमात्रं लुसमुधस्तमस्तकं।

स्थालके परमेश्वरि

182

च परा वीजं

तं पुनः पुनः नववारं महादेव्यास्ततो
नीराजनं चरेत् आरात्रिके महादेव्या
श्चक्रमुद्रां प्रदर्शयेत् श्रीवीजं संलिख्य
मंत्रवित् मः गसौचमपनाप श्रादिं ङः
स्यानुक्रमतो लिखेत् वामकर्णे समा
युक्तान् विंदुनादविभूषितान् वीजपं
चकमेतद्धि पंचरत्नमुदीरितं पूर्ववीज
विलोमेन रत्नेशी यं नवाक्षरी परावी
जं भुवनेश्वरीवीजं गसौचमपनाई॥
तिगकारसकारमकारनकाराएतेप्र
त्येकं लकारोपरिस्थिता ऊंकारविंदु
नादयुक्ताः पंचरत्नवीजानि भवंति ता
नि तु ग्लूं स्लूं म्लूं स्लूं न्लूं पूर्ववीजविलोमे
न मायाश्री क्रमेण कामपनी तंत्रे ई
त्यमारात्रिकं कृत्वा प्रणम्य परदेवतां
प्राणायामं त्रयं कृत्वा मूलमंत्रेण सा
धकः पासं कृत्वा यथापूर्वं ध्यात्वा दे
वी हृदंबुजे मूलमंत्रं यथाशक्ति जपे

शि॰
१८३

183

तद्गतमानसः कृत्वार्णैवे ग्रंथयित्वा मा
तृकावर्णैर्मूलमंत्राक्षराणि चक्र
मोत्क्रमतस्त्रिरावृत्या मंत्रशुद्धिरितीरि
ता शारदातिलके सहस्रं कृत्वा संमा
जप्य मूलमंत्रमनन्यधीः तज्जपं सर्व
मपर्य्यै देवतायै समर्प्पयेत् नित्य
होमे कर्त्तान्तरमाह॥ ऋषिरर्णो मूर्त्तिः
यथाशक्ति जपं कृत्वा नित्यहोमं समा
चरेदिति शैवागमे ॥ अशक्तेन सह
स्रं तु न्यूनं त्रिशतं तु वा ॥ अशक्तेन रश
तं वापि जपेन्नित्यमतंद्रितः ॥ जपो ज
पसमर्पणप्रकारश्च पुरश्चरणप्रका
रणे वक्ष्यते तथा ॥ इत्थं जपं समर्प्याथ
घंटावादनपूर्वकं स्तुवीत स्तुतिभिः
सम्यक् साधको भक्तिसंयुतः ॥ तंत्रांत
त्रे पौराणिकैर्वैदिकैश्च पुरश्चरैर्मूल
मंत्रेणैव च वा हि प्रदक्षिणप्रणामं च कु
र्य्याद्धर्म्मार्थसाधकं ततः क्षमापयेन्म

त्रैवर्ण्यमात्रेणमहेश्वरीस्नापनमंत्रा
प्रयोगेवर्ण्यंते अत्रपौराणिकैर्वैदिके
रितित्रैवर्णिकपरं मूलमंत्रेणेति शूद्र
परत्वेयं शूद्राणांपौराणयदिसत्कृपा
देपिनिषेधात् यदुक्तं कालिकापुरा
णे मोहाद्वाकामतः शूद्रः पुराणंसंहि
तोस्मृतिंपठन्नरकमाप्नोतिपितृभि
सहपापकृदितिपंचरात्राणांतु श्रव
णेपिनाधिकारः यदुक्तंनारपंचरात्रैः
ब्राह्मणक्षत्रियविशांपंचरात्रंविधीय
ते शूद्रादीनांनतत् श्रोतुंपदवीम
धिरोहतीति शैवागमे अर्घ्यपात्रसमु
द्भुतमूलमुच्चार्यमंत्रवित् साधुवासा
धुवाकर्मपटादावगतंमया तत्सर्वं
भगवन्श्रीभोगहारणराधनंपरं इत
घोरकमुत्सृज्याकिंविदेवस्यदक्षिणे
करेसमर्पयेद्विद्वान्कृत्वमाराधनं।
पिबे श्रीकुलार्णवे कृत्वार्चनादि

का = ४

शि
१९४

कं सर्वं समन्त्रो ऽस्तु रसरंडनः पूर्वा
दि मनुना देवताये समर्पयेत् सार
संग्रहे वदेदितः परं पूर्वं प्राणवुद्धि
ततो वदेत् देहधर्माधिरं च ततो ज्ञा
ग्रत्सुषुप्तिच वदेदवस्थासु मनसा
वाचा पदमुच्चरेत् कर्मणा वद हस्ता
भ्यां पद्भ्यामुदरेण च देहेच्छिस्ना
च पश्च्छ्ब्देस्मृतं यत्पदमुच्चरेत् भक्
च यत्कृतं तच्च सर्वं ब्रह्मार्पणं भवतु
स्वाहा तत्र संप्रोक्तो ब्रह्मार्पणमनूत्त
मः मंत्रः प्रयोगे स्वहपित व्यः सनत्कु
मारः उद्वासयेत्ततो देवं परिवारगणैः
सहः प्रपंचसारे स्तत्विं दुखं उपरिमं
ङित मौलि मेव मुद्वासये त्पुनरमुह
स्यं वुजे स्वेपिाव रहस्ये रसिमह्या
महेशास्य पूजिता याश्च देवताः श्री शि
वांगविनीनास्ता: सन्तु सर्वेषु भाव
हाः इति पुष्पांजलिं दत्वा प्रणम्य प

रिभावयेत् देवस्यांगे विनीनं तच्च स्मिवं
दमघोघतः तेजोरूपे शिवं ध्यात्वाक्षम
स्वेति पुनः पुनः क्षमाप्यारोपयेत्त्वीय
हृदंभोजं महेश्वरं गच्छ गच्छ परं स्था
नं परमेश्वर यत्र ब्रह्मादयो देवा न विः
दुः परमं पदं विसृज्यानेन मंत्रेण ततः
पूरकवायुना ध्यायेत्तु मंत्रेणानेन त्वा
तं स्थापयेद्धृदि तिष्ठ परे स्थाने पर
मेश्वर यत्र ब्रह्मादयः सर्वे सुरा तिष्ठंति
मे हृदि विसर्जन संहारमुद्रां बध्वाथ
तेजोरूपां महेश्वरी विभाव्य पुष्पेणो
द्धृत्य वहच्छासाध्वना शिवे प्रवेश्य पद्मा
शांतस्थसहस्रारसरोरुहे विश्राम्य म
ध्यनाड्याना मानीय हृदयांबुजे संस्था
प्य सम्यक् सपूज्य स्वात्मानं तन्मयं स्म
रेदिति हे सपारमेश्वरवचनात् कुल
मूलावतारे ऐशान्यां मंडलं कृत्वा द्वार
पद्मविवर्जितं विसर्जनार्थं निर्माल्य

प्रा.१
१८५

घारिणः पूजनायवै निक्षिप्य तस्मिन्नि
र्माल्यं मंत्रेणानु समर्चयेत् चंडेश्वरं म
हादेवं निर्माल्यैश्चंदनादिभिः लेह्यचो
ष्यान्नपानादिभिर्माल्यस्रग्विविलेपनं
निर्माल्यभोजिने तुभ्यं दद्यामि श्रीशिवा
ज्ञया इति नैवेद्यशेषं तु दत्वा नत्वा वि
सर्जयेत् गणेश्वरपरामर्शिन्यां लंबो
दराय निर्माल्यमैशान्यां मंडलेन्यसेत्
संमोहन पंचरात्रे विष्वक्सेनाय नि
र्माल्यं नैवेद्यं च निवेदयेत् शैवागमे
पूर्वोक्तराशिशि प्राप्तं चंडेशं मंडलेर्चये
त् देवदेवस्य निर्माल्यैश्चापं तं चंडेश्व
रं वामदेवतंत्रे तेजश्चंडोस्य निर्मा
ल्यभोक्ता देवे शिवस्ततः तस्मै सपर्पये
नित्यं नाजिघ्रन्नाक्रमेच्चतत् उत्तरतं
त्रे ततो भास्करबीजेन सहितेनामुना
पुनः मंत्रेण भास्करायार्घमर्च्चिंत्रार्घ्य
निवेदयेत् ॐ नमो विवस्वते ब्रह्मन्

भास्वते विस्तृतेजसे जगत्सवित्रे शुचये
सवित्रे कर्मदायिने नतः कृतांजलिर्भू
त्वा पठित्वा मंत्रमीरितं एकाग्रमनसा वा
ग्भिरच्छिद्रमवधारयेत् जोपक्षच्छिद्रं त
पःछिद्रं पच्छिद्रं पूजने मम सर्वं तदच्छि
द्रमस्तु भास्करस्य प्रसादतः भास्करवी
जंत्र्यक्षरमंत्रः पूर्वमर्घ्यदानप्रकरणे प्रो
क्तः विजयमालिनीतंत्रे अर्घ्यतोयेन दे
वेशि गंधपूजावशेषिणः आत्मनो अर्किंचि
न्मूलेन मंत्रयेद्दृष्धा शिवे प्रोक्षयेत्त
त्तोयेन स्वात्मानं मूलमंत्रतः निर्मा
ल्यं सस्तके धार्यं मूलमंत्रेण मंत्रिणा प्रा
प्य पादोदकं देवि नैवेद्यं विभजेत्त्रिपे
तद्भक्तेभ्यः स्वयं भूत्वा तन्मयो विहरेत्सु
खं ननु शिवादिप्रसादस्वीकारनिषेधव
चनविरोधः तस्याशुचिपरत्वात् स्कंद
पुराणे तन्निर्माल्यस्वीकारस्योक्तत्वात्
स्कंदपुराणे तन्निर्माल्यस्वी पश्चाद्ब्रह्म

हापिशुचिर्भूत्वानिर्माल्यंपरस्तुधारयेत्
तस्यपापंमहत्तस्रीघ्नंनाशापिष्यमहा
स्नानेस्नापयित्वाविधानेनयोलिंगंस्नान
पोदकं त्रिःपिबेत्त्रिविधंपापंतस्येहापि
प्रणश्यति लिंगस्नपनवार्भिर्यः कुर्या-
न्मूर्ध्न्यभिषेचनं गंगास्नानफलंतस्यजा
यतेत्रविपाप्मनः इतितथानिर्माल्यंहि
तुयोभक्त्याशिरसाधुरमिष्यति अशुचि
भिन्नमर्यादोनरःपापसमन्वितः नरके
पततेघोरेतिर्य्यग्योनौप्रजायते इ
ति कालिकापुराणे फलंपुष्पंच
ताम्बूलमन्नपानादिकंचयत् अद
त्वातन्महादेवेनभोक्तव्यंकदाचन
पथिवापर्वताग्रेवासमायामपिमाघ
कः तथातस्मैनिवेद्यैव [illegible]लमपमुप
कल्पयेत् वाराहपुराणे विस्मृत्यांत
रं ब्रूयात् श्रीगोपारंतरंतथा नासिका
नाहिमूर्खाणांवाक्यंशास्त्रविगर्हितं

भविष्यपुराणे यथा शिवस्तथा विष्णुर्य
था ह्युमा उमा यथा गंगा चतुरूपं न विद्य
ते विष्णुरुद्रांतरं यच्च श्रीगौर्योरंतरं तथा
गंगागौर्योरंतरं च यो वक्ति मूढधीस्तु सः रौ
रवादिषु घोरेषु पतत्यधः भविष्योत्तरे
यो ब्रह्मा स हरिः प्रोक्तो यो हरिः स महेश्व
रः महेश्वरः स्मृतः सूर्यः सूर्यः पावक उ
च्यते पावकः कार्तिकेयोसौ कार्तिके
यो विनायकः गौरी लक्ष्मीश्च सावित्री श
क्तिभेदाः प्रकीर्तिताः देवं देवीं समुद्दिश्य
यः करोति व्रतं नरः न भेदस्तत्र मंतव्यः
शिवशक्तिमयं जगत् पद्मपुराणे सौ
राश्च शैवा गणेशा वैष्णवाः शक्तिपू
जकाः मामेव ते प्रपद्यंते वर्षापः साग
रं यथा एकोहं पंचधा जातः क्रीडया ना
मभिः किल देवदत्तो यथा कश्चित्पुत्र
काह्वननामभिरिति विष्णुवचनं गी
तासु अहं हि सर्वयज्ञानां भोक्ता च प्र

श्रि०
१८७

मुरेवचप्रभुःफलदाता विष्णुपुराणेः
यज्ञनूयज्ञानुयज्ञंत्पेनेजयनूनूयः यं
लथान्येहिनत्येवंसर्वभूतायनोहरि
इच्छंसर्वत्रसर्वरूपेणश्रीविष्णोरेवक्री
डुनान्मीडृदेवनाप्रमादस्त्रीकारोदोष
बहइतिभाति विचारकारणमिति अ
त्रश्रद्दत्वात्दित्तनेननिवेद्यैवेत्तनेन
चकिंचिदेयंकिंचिन्द्रोत्कव्यमितिवा
देयभोक्तव्यमितिवाविधीयते अत्र
केचित्तविनियुक्तवियोगदोषाद्भक्ताप
हारप्रसंगाच्चपूर्वःपक्षःश्लाघ्यइतिवि
देनि वस्तुतस्तुकिंचिदग्रशोषादिप
दाभावात्तकर्मानराप्तुनेःनिवेदनमो
जनयोरेककर्मकत्वात् श्रुतिसंवा
दानंत्रदेषिप्रानवाद्यौतरपक्षएवश्रेय
नितिश्रुतिःतस्मादिद्वांसोविरूपहृतं
भक्ष्यपपुरिति नारदपंचरात्रे यन्नाकिं
चितसपमश्रीयात्पुरोविप्रानिवदि

तं विष्णोर्वीर्यमनसा मूलं साष्टधा तं
जपेदिति प्रापश्चिमतमथुक्रमिति विप्र
तिना रक्षसंबोधने नित्यपूजायां संक्षेप
प्रकारः प्रयोगे वक्ष्यते अथ नित्यपूजाया
मति संक्षेपियावश्यावश्यकी क्रियतां।
माहप्रपंचसारे अथ पुनराचम्य गुरूः
प्राग्वदनो विष्टरोपविष्टः सन् प्राणाया
मं सलिपिन्यासं क्लृत्वान्यसेत्तत्त्वमादी।
ति अत एव प्राणायामं मातृकान्यास
ऋष्यादिकरांगन्यासऋष्यादिकराग
न्यासानभिधाप्रोक्तं तन्त्रे वजपारंभेम
नूनां तु सामान्येयं प्रकल्पनेति इयं प्रा
णायामादिक्रियाप्रकर्षेण कल्प्यते सम
र्प्यते अधिकार्यते प्रकल्पना अधि।
कारसंवादनामामान्यासर्वे वरणाश्र
मसाधारणा तैनैतैरेव सर्वेषां पूजा।
धिकारः अत एव तेषामकरणे निंदा
श्रूयते पद्यागसपसंहितायां प्राणाया

शि। १८८

मैर्विनाव्यपघात् कृतं कर्म निरर्थकं प्र
योगपत्नेन कर्तव्याः प्राणामाः शुभार्थिभि
रिति दक्षिणामूर्त्तिकल्पे जयार्थं सर्व
मंत्राणां विन्यासेन लिपेर्विना कृतेन त
न्निःफलं विधात्तस्मादादौ लिपिं न्य
सेत् कपिलपंचरात्रे ऋषिः छंदो दैव
तानां विन्यासेन विना यदा जप्यन्ते सा
धितोप्येष तंत्रं तु तुच्छफलं भवेत् गौत
मीये ध्यानं जपोर्चना होमाः सिद्धमंत्र
कृता अपि अंगविन्यासविधुरा न दा
स्यन्ति फलान्यपी अत एव विधिहीना
नुष्ठाने दोषमाह याज्ञवल्क्यः विधिह
ष्टं तु यत्कर्म करोत्यविधिना नरः फ
लं न किंचिदाप्नोति क्लेशमात्रं हि तस्य
तत् इति गंधर्वतंत्रे प्रवासे पथि गुर्गे
वास्थानाप्राप्तौ जले पि वा कारागा
रनिबद्धो वाप्यायो वैश्यागतो पि वा मनो
जपे समुत्पन्ने सिंहव्याघ्रसमाकुलेप

स्थ्ये

खक्रागमेवैवकुर्यान्मानसपूजनं म
नसाहृदयसंस्थान्तर्ध्यात्वायोगारम्भपीठकं
तत्रैवपृथिवीमध्येपूजांतत्रसमाचरेत्
मैत्रप्रसाधनस्नानंदन्तधावनकर्मवैत्र
न्यच्चसर्वंमनसाध्यात्वाकुर्याच्चपूजनं
पद्यापुष्पादिभि पूजाबाह्यदेशेविधीय
तेतथाहृदयिकतेष्याःसर्वाश्चप्रतिपत्त
पःजलेप्रवहणादौप्राप्योवेशागतःगृही
नानवृतःअन्यच्चसर्वमितिमैत्रप्रसाध
नंदन्तधावनव्यतिरिक्तमित्यर्थःमैत्रा
दीनांमानसासंभवात् नारदपंचरात्रे
ब्राह्मान्मुहूर्तादारभ्यप्रागंशेविप्रवास
रात् जपध्यानार्चनस्तोत्रैःकायवाक्
मनसायुतैःअभिगच्छेज्जगद्योनिंत
च्चाभिगमनंस्मृतं ततःपुष्पफलादी
नामुत्थायापार्जनमाचरेत् भावधामनि
घातिकारणंप्रहरंपरं ततोप्यांगेनपा
गेनपूजयेत्परमेश्वरं साधकःप्रहरं

शि॰ १
१८९

विप्रदत्त्याकालो हि सम्मतः श्रवणे विं
ननंमध्यात्ममततः पाठसंचित्तामाध्या
पकालंतद्दिक्कालांतंमुनिसत्तमा
दिनावसानेसंप्राप्तेपूजांकृत्वासमभ्य
सेत् मियोगंनिशावसानेपश्चामेरंत
रीकृतंविप्रेतिनारदसंबोधनं श्रादि
पदेनसमिदाधारणं समित्पुष्पकुशा
दीनांसकालः समुदाहृते इतिदक्षव
चनात् अंगेनयोगेनितिस्वपमेवविद
णोतिमध्याह्नाकेनदेषांचपूजाचप
शुनाचपात्रितपंतत्र्यपणांगंतुर्यमन्य
चपूजने मध्याह्नेम्यनेनमधुपर्कउक्त
पशुत्वरंगंविष्णुधर्मोत्तरे माधुपर्कि
कपश्वर्थंततो मन्त्रांनिवेदयेत् महि
रण्यबीजपात्रंदक्षिणेनसर्वेनु पशुः
कल्पोनकर्तव्यइत्याहभगवानभृगुः
दक्षिणंदक्षिणा एतन्मध्याह्नपूजनं
ततरंसतिसंभवेकार्यं तथात्तत्वसा

रसंहितायां श्रीमातुरीसोत कीचैव त्रासी
दैवाधिकीतथा साधनाभाविनीचेति
पंचधाभिघत्ते पुनः यदिलंघनपर्यंतो
माधिरात्मनिदृश्यते तदा पूजा न कर्तव्या
स्थंडिले प्रतिमासु च स्नानं देवकार्ये वा
कुर्यात् द्वेपथापिवा रविमंडलमाल्यो
क्य प्रतिमामथवापुनः मूलमंत्रस्यहृ
ज्जस्त्वा पुष्पं साक्षतमुत्क्षिपेत् शांतो
व्याधिरसुग्रैः क्रांतश्चैवोपवासकैः नि
जसामपि केवोपिस्वकर्तव्यं समापयेत्
स्नात्वा देवमथाग्नींश्च गुरुन् विप्रान्ए
तान् च कालाविविधापूज्यसमाहितः न
रोपोस्थितिसंप्राप्य जपहोमादिकं च
कार्यं यस्तु रोगवशान्मोहवशान्मोह
वशाद्रोपउपागतेः जपेन क्षालनीयः
स्याद्दानेन हवनेन च ध्यानेनापि सु
निश्चेष्टः स्नात्वा कर्म बलाबलमिति ना
रदपंचरात्रवचनात् तथा ग्रंथसूत

पि॰१
१९०

किनःपूजांवदाम्यागमवोधतो ज्ञात्वा
नित्यंचनिर्वर्त्यमानस्याक्रियथानुवेवा
ह्यपूजाक्रमेणैवस्थानयोगेपूजयेत् य
दिकामीनचेत्कामीनित्यंपूर्वं वदाचरे
त् ज्ञासिनोवक्षतेपूजायथैवागमवो॰
धितो लघ्वंवापरिवालवामर्थपात्रा
दिसाधनं पूजोदकेनकर्तव्यानचतो
पंचविधते नदासंपूजयेदेवंभावना
कुसुमादिभिःदोर्वोधकीप्रवक्षामिपू
जाभागमवोधितो मूर्खस्त्रीबालवृद्ध
यादुर्वोधाइतिभाविताःरत्नमंडपध
मादिचतु[illegible]गंबुजं मूलमूर्तिः
षडंगानितेषांपूजाविधीयते अन्ये॰
षांप्रोक्तासंक्षेपकर्मणि सर्वेषामेव
वसूनामत्नाभेभावनेवहि निर्मलः
नोदकेनापिपूर्णातत्याहनारदः तथा
पुनस्त्रिधापूजाउत्तमाधममध्यमात्र
धिकारिनिमित्ताभ्याविभिधेतेषान

धापुनः यागोपकरणैः कृत्स्नैः क्रियमा
णोत्तमामता यथालब्धैर्विनिष्पाद्य द्र
व्यैः पूजा तु मध्यमा पत्रपुष्पांबुनिष्पाद्या
पूजाधममसंतका विदित्वाखिलवेदा
र्थं ब्रह्मर्षिभिरकल्मषैः क्रियमाणा तु या
पूजा सात्विकी सा वित्तिदा राजर्षिभिस्त
पोनिष्ठै भगवत्स्ववेदीभिः या पूजा क्रि
यते सम्यग्राजसी सा सुखप्रदा स्त्रीबाल
वृद्धमूर्खाद्यै भक्तै रस्तुङ्मानसैः या पूजा
क्रियते नित्यं तामसी सा प्रकीर्तिता तथा
आराधनासमर्थश्चेद्ध्यात्स्वेन साधनं यो
जयेत्तु नैवेशा क्रांति कुर्यात्स्वेन दर्शनं नैवे
कल्पस्य विधेत्साधो पापात्मवनान्यथा
यस्तु भक्त्याप्रयत्नेन स्वयं पापचाखिलं
साधनं चाविधेहि द्वानुसमग्रफलं ल
भेत् योर्चयेद्विधिवद्भक्त्याचापरानीतै
र्वसाधनैः पूजाफलार्द्धमेवास्य न सम
ग्रफलं लभेत् कुंभसंभवः सुस्पः सम

शि।
२९१

र्यः कुर्वीतोत्तमैरेव साधनैः मध्यमो
मध्यमैरेव न्यूनो न्यूनैस्तपोधन ग्राप
कं चत था च जपमालिकां एवं ध्यात्वा यजे।
द्देवीं मानसैरुपचारकैः पञ्चमस्याः प्रवक्ष्या
मि त्रिकोणं तत्सुटं लिखेत् वह्निरष्टदलं प
द्मं रवि पत्रं ततो लिखेत् तस्य त्रिकोणस्य पु
टं षट्कोणमित्यर्थः षडंगावरणं देवि पूर्वं व
त्पूजयेच्छिवे रत्नादि त्रितयं देवि त्रिकोणे
परिपूजयेत् डाकिन्याद्यास्तु षट्कोणे वसु
पत्रे ततः परं वह्न्यादियुगलं पश्चाद्रविप

त्रैतत्त्वपरं वाल्लाया: पीठशक्तीश्च वमाश्रिता
पूजयेत्क्रमात् चतुरस्त्रे लोकपालान्नायु
धान्परमेश्वरि इत्येवं षट्कूटाभैरवी एतस्य
एव विपाया: षट्वर्णान्क्रमत: स्थितान्
न् विपरीतान्वरे देवि विधेयं भोगमोक्ष
दा नित्याद्या भैरवी देवी रिपुमारविनाशि
नी विपरीतान् हसकलरडै इत्यादिक्रम
परितान् इत्येव षट्कूटाभैरवी न्यासपूजादि
कं सर्वमस्या: पूर्ववदाचरेत् इतिहसाद्यं
वाग्भवं देवि हसकान्ते सुरेश्वरि भूवी
जं भुवनेशानी द्वितीयं बीजमुद्धरेत् शिव
वचन्द्रो महासेनो भुवनेश्वरि भैरवी भू
बीजलं शिवो हश्चैव र: सश्च श्रौं स्वरूपं च
महासेनो विसर्गश्च तितृपं बीजं मध्य
बीजेन देवेशि षट्दीर्घस्वरभेदिना ष
डंगानि प्रविन्यस्य हसकल ह्रीं हृदया
य नम: हसकल ह्रीं शिरसे स्वाहा इत्या
दिप्रयोग: ध्यायेद्देवी चतुर्भुजां जवा

कुसुमसंकाशा दाडिमीकुसुमप्रभा चंद्र
रेखाजटाजुटा त्रिनेत्रा रक्तवाससं नाना
लंकारसुभगा पीनोन्नतघनस्तनी पाशांकु
शावराभीतीर्दधानां शिवाश्रये वामोर्ध्वा
स्थितस्थोन्तमायुधध्यानं चैतभैरवीदेवि
पंचवक्त्रपरमेश्वरि अस्याःपंचमिति शोष
षडंगावरणं देवि पूर्ववत्परतो यजेत् र
त्याद्याः पूजयेद्देवि त्रिकोणे तदनन्तरं ब्र
ह्माद्याविष्णुरुद्रश्च पूज्यास्तत्रैव सुन्दरि
डाकिन्याद्यास्ततः पूज्या वसुपत्रेततः पा
रंडाकिन्याद्याः षट्कोणेषु अनंगकुसुमाद्या
श्च ब्राह्माद्याष्टुगुले न ततः भूबिम्बे लोकपा
लो श्चबटुकाद्याः श्च पूज्यये त बटुकाद्या
न्हेतुकाद्यान्योगिनिनीं चतुः षष्टिं पूजये
त्सुखं दत्ते चतुः षष्टी योगिनीभ्यो नमः इति
प्रयोगः अष्टपत्रेषु भूबिम्बे त्वे कोन्नारेण पू
जयेत् अष्टादश महाकोटियोगिनीभ्यो न
मो लिखेत् अनेन मनुनेति कोटियोगि

त्रि॰ ४६८

468

सर्वांयां संहितोक्तेः भुवनेश्वरभैरव्या भेदान्त रमघोच्यते महाघासैव देवेशि तत्र चकम लेश्वरी ध्यानपूजादिकं सर्वमतस्याद्भुपाव त्ति संपत्प्रभैरवी च विद्धि कोणेश भैरवी सा त्र हसराया भैरवी सात्रिषु पावीत्ति इयं तु स हराद्यास्यात्पूजाध्यानादिकं तथा तथा सं पत्प्रदा वत् एतस्या एव विद्यायाः आद्यं तेरे फवर्जितं तदेयं परमेशानि नाम्ना सक लसिद्धिदा संपत्प्रदा भैरवी च ध्यानपू जादिकं प्रिये एतस्याः कोलेरा भैरव्याः ए तच्छब्दस्य प्रत्यासन्नपरत्वात् संपत्प्रदा यास्तु कोले प्रपा विच्छेदात् अथैष ज्योति रथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतत्सत्रकुर्मान्सरकल्पनमत एव अ थप्राब्देन पूर्व पूर्वाविच्छेदादिति दक्षिणा मूर्तिसंहितायां त्रिपुरेशीतन्त्रमध्ये वाणा प्रोक्ताः महेश्वरि तेरेवपंचभिर्वाणैर्विद्या पंचाक्षरी भवेत् त्रिपुरेशीतन्त्रमध्ये वा।

लाप्रकारणेतैः पंचभिर्बाणैः द्रां-ह्रीं-क्लीं-म
ब्लूंसः इत्येतैः तथा ऋषिरस्यास्तु मदनो गा
यत्रं छंद ईरितं बाणेश्वरी वदेवेशि देवता
चेयमीश्वरि व्यस्तैः समस्तै रंगानि पंचबाणै
रथाचरेत् द्रां हृत् द्रीं शिरः क्लीं शिखा ब्लूं क
वचं सः नेत्रं समस्तैः अस्त्रं पूर्ववत्पंचबाणे
नं न्यासं कुर्याद्विचक्षणः पंचकामांश्च वि-
न्यसे पूर्ववत्परमेश्वरी उद्यदिवाकराभासां
नानालंकारभूषितां बंधूककुसुमाकारर
क्तवस्त्रांगरागिणीं इक्षुकोदण्डपुष्पेषुवि-
राजितभुजद्वयां ध्यायेदिति शेषः त्रिपुरेशीव
शां पूज्या मोहयेज्जगतीमिमां एवं ध्यात्वा व
र्णलक्षं जपेन्मंत्रं समाहितः तद्दशांशेन जु
हुयाद्बंधूककुसुमैस्ततः अंगन्यासान्तं कृत्वा
बाणकामौ विन्यस्य पीठादि जपान्तं पूर्ववत्कु
यात् पूर्वोक्तपंचकामैस्तु पंचकामेश्वरी भवे
त् ऋषिः संमोहनो नाम गायत्री छंद उच्यते दे
वतेयमिति इयं कामेश्वरी व्यस्तैश्च समस्त

शि॰१
४६९
469

कै अंगानि पूर्ववत्कामबाणन्यासहृदयं पंचरे
त ह्रीं हृत् क्लीं शिरः ऐं शिखा ब्लूं कवचं स्त्रीं
नेत्रं सर्वैरस्त्रं रक्तां रक्तदुकूलां गंधलेपनां रक्त
भूषणां पाशांकुशधनुर्बाणपुस्तकं वाक्ष
मालिकां वराभीती वदधती त्रैलोक्यव॰
शकारिणीं पंचकामैः परिवृतां ध्यायेद्देवीं
विचक्षणः वामापूर्ध्वे योणयेत्तदाधःस्थ
योरन्येतदाधधःस्थयोरितरे आयुधानि वि
न्नयेदिति अन्यत्सर्वं पूजनादि पंचबाणेश्व
रीवद्वै अंगन्यासांतं कृत्वा बाणकामौ विन्य
स्यपीठन्यासादि जयांते पूर्ववत्कुर्यादिति श्री
यंत्रसारे मदनभासितमध्यमथैंद्रिपच्छद
विराजीत्तपंचमनोभवं स्मरपारैर्लिपिभि
श्चसमावृतं कुमहकोणविराजितमन्मथ
लिखतु पंचमनोभवमेतदित्यदितयंत्रम
शेषसमृद्धिदं कनकनिर्मितपट्टतलेततः
शुभतरे दिवसे विधृतं कृतं सकलमानव
सिद्धिसुरांगनाहृदयरंजनमीप्सितकामदं

स्वकर्पूर्विविभूषणयोजितं घृतवतीवनि
तायखिलान्तरान् निजवशेप्रविधापरं
मांपरोसमधिगम्यसुत्तैः सहमोदते इति विवि
लिख्यचकुंकमकर्दमे तदनुलिप्ततनोः
सकलंजगत् वशमुपैतिनिरीक्षमाणमा
त्रतः किमुतसान्तसहासनसंगमे अपमर्थ
पंचदलंकमलंकृत्वा तन्मध्येसमाध्यंका
मवीजंविलिख्य तद्दलेषुखाग्रादिप्रादक्षिणे
नमूलमंत्रस्यैकैकं वीजंविलिख्य तद्बहिर्वे
नत्रयंकृत्वाभ्यन्तरवीथ्यांपूर्वोक्तपंचवाण
वीजैरावेष्ट्य द्वितीयवीथ्यांमातृकार्णैरावे।
ष्ट्य तद्बहिश्चतुरस्रंकृत्वा तत्कोणेषुकामबी
जंलिखेदेते तुक्तविधिनाघृतमुक्तफलदं
भवतीतितथा वाग्भवंत्रिपुरेशान्याहित्वा
तत्स्थानेक्षिपेत्सुधीः कामशक्तिद्वयांतस्तुविधे
यंत्र्यक्षरीभवेत् कामेश्वरीतितद्वाग्भवंस।
क्षिपेत् तेन क्लीं ऐं सौः इतिसिद्धिरावृत्या षडंगा
निपंचवाणानप्रविन्यसेत् पंचकामांश्चवि

शि॰ ।
४७०
470

न्यस्य मूलेन व्यापकं न्यसेत् ॥ उद्यत्सूर्यसह
स्राभो माणिक्यवरभूषणां स्फुरद्रत्नदुकु
लाढ्यां नानालंकारभूषितां ॥ इक्षुकोदण्ड
बाणांश्च पुस्तकं चाक्षमालिकां दधतीं चिं
तयेन्नित्यं सर्वराजवशंकरीम् ॥ वामाघूर्ध्व
योराघेन दाघधःस्थयोरन्येद्वतापुधघ्वा
नं ॥ अंगानेतरं पंचबाणानुप्रपूज्यैव वरत्वादि
त्रितयं पजेत् ॥ ततोनंगाघष्टकं च समैरव
समानरम् ॥ अष्टपत्रेषु वाग्रेषु पजेत्सीठाष्ट
कं प्रिये ॥ इन्द्रादयश्च संपूज्या मध्ये देवीं सम
र्चयेत् ॥ पुरश्चरणकृत्यं तु त्रिपुरे शीवसुंद
रि ॥ अंगन्यासं कृत्वा बाणकामौ विन्यस्य मू
लेन व्यापयप्य धादि जपान्ते कृत्वा पोषं समापये
दिति ॥ तथा केवलं कामबीजं च कामेशीम
नुरुच्यते ॥ ऋषिः संमोहनः प्रोक्तो गायत्री छं
दईरितं कामेश्वरी देवतास्यात्क तुर्यबीज
शक्तिके ॥ पृथिवी कीलकं प्रोक्तं महावपप
करीमता षट्दीर्घस्वरभेदेन षडंगानि प्र॰

विन्यस्येत् पूर्वोक्तपंचवाणांश्चपूर्वबद्धिन्य
सत्प्रिये जयाकुसुमसंकाशंपंधनुर्वाणधा।
रोस्मरेत् नानालंकारसुभगांमोहयन्तींज
गत्रयं त्रिकोणंचाष्टपात्रंचततोभूविम्ब
मालिखेत् मोहनीक्षोभणीचैववशिनी।
स्तंभिनीत्तथा आकर्षणीद्रावणीचतथै
वाल्हादिनीक्रमात् क्लिनाचक्लेदिनी।
चैवदिक्षुमध्येचपूजयेत् ततःसिंहासनं
चेष्टादेवीमावाहयत्प्रिये उपचारैःसमा
राध्यततोमुद्रांप्रदर्शयेत् अग्नीशासु
रवायव्यमध्यदिक्षुंगपूजनं त्रिपुरेपंचव
वाणानामर्चनंपरमेश्वरि अनंगरूपिण
नंगमदनानंगमन्मथा अनंगकुसुमान्
द्वद्वनंगमदनातुरा अनंगशिशिराचैव
तथाचनंगमेखला अनंगदीपकाचाष्ट
दलेषुक्रमतोयजेत् इंद्रादयश्चसंपूज्या
पुनराराधयेच्छिवाम् अर्कलक्षंजपेन्मं
त्रंबंधूककुसुमेर्हुनेत्तत्दशांशेनदेवेशि

शि॰ ४७१

पुरश्चारी न ततो भवेदिति अथ प्रयोगः ज्ञा

त्वा प्रातः कृत्यादि योगपीठन्यासांते शिरसि

संमोहन ऋषये नमः मुखे गायत्री छंन्दसे

नमः हृदि श्रीकामेश्वर्यै देवतायै नमः गु

ह्ये के बीजाय नमः पादयोः ई शक्तये नमः

मा मौ लं कीलकाय नमः इति विन्यस्य म

मेष्टार्थ सिद्धये विनियोगः इति कृताजलि

र्लंकां क्लीं क्लीमित्यादि करषडंगन्यासं

विधाय ध्यानादि स्नानास्मार्चांते स्वाग्राग्र

हृदले केसरेषु अं मोहिन्यै नमः एवं क्षो

भिण्यै वशिन्यै स्तंभिन्यै आकर्षिण्यै द्राविं

ण्यै ह्रादिन्यै क्लिन्नायै क्लेदिन्यै नमः

क्लीं सर्वशक्तिकमलासनाय नमः इति

पीठमभ्यर्च्यावाहनाद्यर्घ्यपूर्वं वल्कः

त्वा बालाप्रकारेणोक्तवत्संच बाणान्संपू

ज्य देवाग्राग्रपत्रेषु अं अनंगरूपि

ण्यै नमः एवं अनंगमदनायै अनंगमन्म

थायै अनंगकुसुमायै अनंगमदनातुरा

यै अनंगप्रियायै अनंगमेखलायै अनं
गदीपिकायै नमः इति संपूज्य लोकपा
लाद्यावरणं समापयेदिति सुन्दराचार्य
शिष्येण श्रीनिवासेन धीमता चन्द्रिकायां
प्रणीतायां त्रयोविंशः प्रकाशः इति श्री
सुन्दराचार्यचरणारविन्दद्वन्द्वान्तेवासिना
श्री श्रीनिवासभट्टेन विरचितायां श्रीशिवार्च
नचन्द्रिकायां त्रयोविंशः प्रकाशः सारसंग्र
हे राजमातंगिनीमंत्रं प्रकाशयामि यथावि
धि यत्पादद्वन्द्वसरसीरुहसंस्मृतितो नरः
लभते मुक्तिममलां दुःप्रापां सिद्धसंचयैः
येन चाकर्षणं साध्यं वशीकारो यतो भवे
त् क्षिप्रं येन वांछितमाप्नोति यशस्वी निय
तं भवेत् दुरितौघप्रविध्वंसः सौभाग्या
प्तिश्च निश्चिता सेवितं संततिकरं यस्या नि
गडमोचनं समस्तेषु शास्त्रेषु पाण्डित्यमधि
कं भवेत् विशिष्टः स्पष्टगंभीरपदस्यावि
न्यासकोमलैर्ललितैश्च कवित्वैः सोप्राग

शि॰।
४७२

472

ल्मः सुतरां भवेत् संगीतिसर्वविद्यासुव
त्वेन निपुणो भवेत् मेरुरेतस्य कमला-
माध्वनश्वरविभ्रमा निरंतरं च वसति
नात्र कार्या विचारणा किमत्र बहुनोक्तेन
वचसां पतिरेव सः कान्त्या रतिपतिर्ल-
क्ष्म्या कमलापतिरप्यसौ द्वादशो दण्डियु
ङ्व्यामर्चवह्निर्दण्डित्रिमूर्तियुक् नादरूपं
भवेदस्यिस घोविंदुयुतः सुहृत् सप्तामध्ये
गवार्णौ स्तो विविन्दुकमला विषं कांतियु
कामिकाविन्दुयुक्ता काद्यक्षतोयकं शिव
युक् खरिपाद्यंते भगुरग्निश्च केवलः
म्बुक्षितीवको स्य मध्यस्थं च तत्प
चमं विषमो व्योम वह्नीरकः सर्वांतिसुच
कात्परं राजिसर्वसुखप्रो क्रामविंदु वह्नि
रीरितः जन्यन्तेप्रवेदत्सर्व वर्णाकयोस्तु म
ध्यतः राजते स्त्री पुरुषं दुष्टमगंसत्वं चतुर्थं
च स्यामेषु सर्वलोकांतेविषं तत्कर्णयुक्
कं आदित्यः शिवयुग्नीरं तदंतं कांतियु

ग्रवि:दीर्घामरुश्चमग्वमप्नुव्योमकांतियुत्तंम
नु: अष्टाशीत्यक्षर: प्रोक्त: सर्वकामफल
प्रद: रक्षार्थं सर्वलोकानामायुरारोग्यव॰
र्द्धन: शांतिके पौष्टिके चैव वर्द्धे सिद्धिकर:
पर: अपमृत्युजय श्रीदोह्यपस्मारक्षयंक
र: सर्वज्वरांश्च शूलानि शाकोनाशयितुं स
णात् राजद्वारिविशेषेण संग्रामे रिपुसंक
टे अग्निचोरनिपातेषु सर्वग्रनिवारणे रा
क्षसेषु पिशाचेषु गंधर्वेषूवगेषु च नदीप्र
तरणे दुर्गसंप्राप्ते प्राणसंशये असौ मंत्र:
प्रयुक्त: स्यादेतत्सर्वनिवारण: स्त्रीणां सौभा
ग्यहीनानामपुत्राणां विशेषत: अपुष्पाया
नपात्याया सदापुष्पवती च या पतिद्वेष्याच
या नारी दुष्टा श्वश्रूजनं प्रति याबंध्या मृत
पुत्रा च निद्रालस्यमहामुहे: इत्येवमादिदो
षेश्च दुष्टानां पोषितामयं शक्तस्तेष्ववहर
णे स्मरणादेवानिश्चितं स्त्रीवश्यनरवश्या
दि सर्ववश्यजपप्रद: स्त्रीणां संमोहने शा॰

पि॰ ६७३

473

कोनराणंच विशेषतः मतंगमुनिनापूर्वंगी
तलेनाप्यनुष्ठितः वासुदेवेनगीतोयंतुम्बु
रुप्रमुखोदिभिः जप्तः सदामहामंत्रो वसि
ष्ठाद्यैर्महर्षिभिः ह्रांदृशाएदशाडीअनुस्वार
तयुक्तः व्योमह वन्हीरेफः देशाडी अनुस्वार
त्रिमूर्त्तिरीकारः एतेमोयावीजमुद्धृतं अस्थि
या ताद्रूपं वन्हिदशाण्डत्रिमूर्तियुतमित्यर्थ
तेनश्री सघः श्रो विंदुरनुस्वारः तेन श्रीं हृत
नमः मत्सोर्मध्येगवर्णोतेन भगवति विवि
न्दुकमला श्री विषमं कांतियुक्तआकार
युक्तः तेनमा कामिकात्त विन्दुयुक्तातेन
ते कत्ततीयं शिवंएतेनगेश्वरिस्वरूपंभृ
गुः सअग्निः रः केवलः स्वररहितः अम्बु
वतेनवं द्वितीयवर्गस्यमध्यस्थंजः तपंव
मंन विषमं त्रोस्वरूपे व्योमह वन्हिः रः ह्रः
कइतेनरि सर्वस्वरूपे मुखरूपं कांतारख्व
राजिस्वरूपं सर्वमुखस्वरूपं विसविन्दुवं
न्हिः रं जनिस्वरूपं सर्ववशकार्यो मध्यरा

जपदं विष्णुपुरुषपदं दुष्टमृगपदं सर्वप
दं चएकैकं वदेत् चतुर्थ्युस्थाने छित्युक्तेः स
र्वलोकस्वरूपं विषमं पुनस्तत्कर्णयुक्तेन
नमुकं स्वरूपं आदित्यमं शिवपङ्कं एकार
युक्तः तेन मे नीरवे तदन्तेश कान्तियुग्म विः
मारीचेन मरुत्पभगुः सअम्बुवः आत्म
रूपं तेन स्वाबोम हुं तत्कान्तियुक्तं आकार
युक्तं तेन हाः तथा दक्षिणामूर्तिरस्य स्याद्दृष्टि
छंदउदाहृतं गायत्रं देवता प्रोक्ता मातंगी सर्व
सिद्धिदा एकविंशतिभिर्वर्णैर्हृदयंसमुदाहृ
तं त्रयोदशाभिर्वर्णैः स्याच्छिरस्त्वाष्टादशार्णे
कैः शिखानावद्धिर्वर्णैः स्यात्कवचं दशाभिस्त्रि
भिः नवेद्वाभ्यांमथास्त्रस्या मंत्रवर्णैर्विभक्ता
भाग्यशः वाङ्मायाकमलाद्याषेन्यासं कुर्या
त्करांगयोः आद्यैः प्रथमोक्तैरेकविंशतिभिः
वर्णैः तेन चतुर्विंशति वर्णात्मको हृन्मंत्रः
वर्णैश्चतुर्भिर्विंशत्यास्याद्धृदिति शारदाति
शारदातिलकवचनात् शिरोललाटभ्रू—

शि॰ १
६७४
474

मध्ये तालुके ७ गले २ हृदि अनाहते भुजद्व
न्द्वे जठरे नाभिमण्डले स्वाधिष्ठाने गुह्य
देशे पादयोर्दक्षिणान्ययोः सप्त पंक्तिर्दश
वेदाश्चत्वारः अग्नयस्त्रयः । मूलाधारे
गुदे न्यसेत्सदा न्यस्तादिशाक्रमात्तु कं ७ स्त
न्माणिः गलेः तदधः गुणोकद्विवनुः षड्
वेसुषट्पर्वताष्टभिः दशापंक्त्यष्टवेदाग्नि
चन्द्रयुग्मगुणास्त्रिभिः गुणास्त्रयः वसुवा ८
ष्टौ पर्वताः सप्त पंक्तिर्दश वेदाश्चत्वारः अ
ग्नयस्त्रयः चन्द्र एकः प्रक्षिष्ट्वयं तथा पंक्ति
रियं प्रोक्ता मंत्रवर्णैर्यथाक्रमं तथा रत्या ८
धामूलहृदयभ्रूमध्येषु विचक्षणः वाक् ।
शक्तिलक्ष्मीबीजाद्यामातंगयन्ताः प्रविन्यसे
त् तिसृणामपि प्रत्येकं बीजत्रयादित्वंशे
षं । शिरोवदनहृद्गुह्यपादेषु विधिवन्न्य ।
सेत् हृल्लेखां गगनां रक्तां भूयो मंत्री करा
लिकां महाबुध्यास्वनामादिवर्णाबीज
पुराः मातंगयन्ताः प्रविसेत् तिसृणामपि

प्रविन्यस्यबाणन्यासमथाचरेत् मूर्द्धियादः।
स्यगुह्येषुहृदंभोजेप्रविन्यसेत् द्रावणीशो
षणीभूयोबंधनीमोहनीपुनः आकर्षणीस्व
नामादिवीजाद्याःशुभलक्षणाःमातंग्यन्ता।
स्ततोन्यसेन्मथात्वदनांसयोःपार्श्वकत्योर्नौ
भिदेशेकटिपार्श्वेसक्थेपुनःवीजत्रयादिका
मंत्रीमन्मथंमकरध्वजंमदनंपुष्पधन्वा।
नंपंचमंकुसुमायुधंषष्ठंकंदर्पनामानंम।
नोभवरतिप्रीयोमातंग्यंतास्ततोन्यसेत्स्था
नेष्वेतेषुमंत्रवित् स्वनाम्नामादिवर्णाश्चवी
जानीतदाद्याःकेचित्तुस्वनामादौपूर्वोक्तवी
जावाइतिवदन्ति एवंवेदाद्यष्टाद्वैपर्य्यप्र
संगोद्भुःपरिहरःवीजत्रयंमूलमंत्राद्यंप्रथमा
नंगकुसुमाभूयोन्यानंगमेखला अनंगम
दनातद्वदनंगमदनातुरा अनंगमदनोद्वे
गाभूयश्चानंगसंभवा सप्तम्यनंगभुवनपा
लिनीस्यादष्टमी अनंगशशिरेखाख्या
मातंग्यंताःसमीरिताःविन्यस्तव्यास्ततोमू

शि०
४७५
475

लेधिष्ठानेमणिपूरके हृत्के च स्वभ्रुवोर्मध्ये
मस्तके मंत्रिणस्ततः आद्येलक्ष्मीसरस्व
त्यौरतिः प्रीतिश्च कीर्तिका शांतिः पुष्टिः स्त
थातुष्टिर्मातंगीपरमेश्वराः मूलमंत्रं प्रवि
न्यसेन्निजमूर्द्धनि मंत्रवित् आधारदेशे
विधिष्ठाने नाभौपश्चादनाहते कंठे च के भ्रु
वोर्मध्ये मस्तके विन्यसेत्क्रमात् ब्राह्म्याद्या
पूर्वमुद्दिष्टामातंगीपरपश्चिमाः एषुस्थाने
षु विन्यस्य दसितांगादि भैरवान् असितां
गो रुरुश्चण्डः क्रोधोन्मत्तकपालिनः भीषण
श्च संहार इत्यष्टौ भैरवाः स्मृताः आधार
देशेधिष्ठाने नाभौपश्चादनाहते कंठदेशे
भ्रुवोर्मध्ये बिंदौ बिंदौ भूयः कलापदे निरो
धिकायामर्द्धेन्दौ नादान्ते यो ऽपुनः उन्मन्यां
विषुवच्चक्रो च ध्रुवमण्डलके शिवे भ्रुमध्या
दिशिखान्तानि स्थानान्यूर्ध्वोर्ध्वक्रमे यानि मा
तंगपन्ताः प्रविन्यस्य द्वामोन्येष्टामतः परं
रौद्री च शांतिं पद्दाख्यां पुनर्वागीश्वरीमथ

क्रियांशान्तिं च लक्ष्मीं च मस्छिसंज्ञां च मोहिनी
प्रथमां भाविनीं विद्युन्मालां विच्छित्क्रमप्यु-
ष तत्तश्चसुन्दरानंदा नागवुद्धिरितिक्रमा'
त् शिरोभालहृदाधारे ष्वेताविजत्रयास्त्रिका
मातंग्याघाग्रविन्यघथावदेशिकोत्तमः मा
तंगीमहदाघान्तांमहालक्ष्मीपदादीकं सि
द्धिलक्ष्मीपदाद्यान्तांमूलमाधारमण्डलेन्य
स्यत्तेनैवकुर्वीत व्यापकंदेशिकोत्तमः एवंन्य
स्तशरीरोसौचिन्तयेन्मंत्रदेवतां अमृतोद-
धिमध्यस्थेरत्नद्वीपेमनोरमे स्वर्णप्रकारसं
वीतेमण्डपेरत्ननिर्मिते कदम्बबिल्वकल्हा
रकल्पवृक्षोपशोभिते विद्येमध्येसुखासीरे
णरत्नसिंहासनेशुभे अष्टपत्रेमहापद्मे के'
सराढ्यंसकिर्णिकं तन्मध्येचत्रिकोणंस्यादष्
टपत्रंततोवहिः पुनः षोडशपत्रंस्यात्तद्वहि
स्याच्चतुर्दलं एवीससचतुर्द्वारंमण्डलंप्रोक्त
मुक्तमम: तस्यमध्येसुखासीनांशुणामघर्णां
शुचिस्मितां कदम्बमालाभरणांपूजितां

शि०।
४७६
476

चसुरासुरैः प्रलम्बालकसंयुक्तो चन्द्ररेखा
वतंसिको ललाटे तिलको पेतामीषन्म्र।
हसिताननां किंचित्स्वेदाम्बुमधुरल ला
टफलको ज्वलां वलीतरंगमध्यां तो रोम
राजीविराजिताम् सर्वाभरणसंयुक्तो मुक्ता
हारविभूषितां नानामणिगणो न्नद्धकटिसू
त्रैरलंकृताम् वलयैरत्नखचितैः केयूरैर्मा॰
णिभूषितैः भूषितांद्विभुजां बालां मदाघूर्णि
तलोचनां आपीनमण्डलाभोगसमुन्नतप
योधराम् प्रलम्बकर्णाभरणां कर्णोत्तंसविरा
जितां तमालनीलां तरुणीं मधुमत्तां मतं॰
गिनीम् चतुःषष्टिकलायुक्तां पार्श्वस्थशुक।
शारिकां कोटिबालार्कसंकाशां जपाकुसुम
सन्निभां एवं वा पीतवर्णां वा ध्यायेन्मातंगी
नीपरां धर्मादिकल्पिते पूर्वोक्ते पीठे शक्तीर्न
वार्चयेत् मातंग्यंताविभूत्यते ऽन्नतिः कां।
तिरेव च सष्टिः कीर्तिः सन्नतिश्च व्युष्टिरु
त्कृष्टिरेव च ऋद्धिश्च नवमी प्रोक्ता मातं

सुवसंपूज्या कूलेरवाधाय क्रमम् गुणसृणुभयप्राणि वहन्त्यो
भूतसप्रभाः अग्नीशरक्षः पवनकोणेष्व ग्रे दिशासु च यजेदंगानि मन्मथः
पंचबा

ग्याः पीठशक्तयः बाह्याया कमलाः सर्वेशा
क्यन्तेकमलापदे सनापनमङ्लकामातं
ग्याः पीठमर्चयेत् देव्यामूर्त्तिञ्चमूलेन कल्प
यित्वा यथाविधि तस्यामावाहयेद्देवीमर्चये
द्विधानवित् दलाद्याः पूजयेन्मंत्री त्रिषु को
णेषु च क्रमात् पुरतो दक्षिणे सव्ये रतिप्रीती
च सांजली: कशांकुशकरे श्वेतासिते वा न्या
च सांजलिः अरुणा सेक्षुकोदण्ड पंचबाण
लकरा मध्ये दिक्षु च संज्या कूलेरख्याधाय
याक्रमम् पुरतो दक्षिणे सव्ये रतिप्रीती च सां
जली कुशांकुशकरे श्वेतासिते वा न्या च सां
जलिः अरुणा सेक्षुकोदण्ड पंचवासालत्क
रा मध्ये दिक्ष्णांस्तलो पजेत् दिक्ष्व ग्रे क्रमातो
मुक्तास्वर्णविद्रुमहीरकान् अमलारुणा
भा पुस्तकान् धनुर्वाणधरास्तथा दलेषु पूज
येद्ग्राक्स्रं गकुसुमादिकाः गुणसरा प
मये हानि धारयंस्तो रुणप्रभा अयेदलामा
संपूज्या लक्ष्म्याद्याश्चारुभूषणाः लक्ष्मीर्हे

शि॰ १
४७७

477

मप्रभायद्यकरान्यापुंखसन्निभा विन्मुद्रा
पुस्तकराधनुर्बाणौकरे परे श्वेतासिते कु
न्दसमाचिन्मुद्राजकरापरा विन्मुद्राम
यपुकुम्भान्तिरक्षणान्येभयेहृदे द्वितीये दृ
दलेपूज्यामन्मथायामदोद्धताः पुरश्चाक्षु
ष्टचापजाः पृष्टतः संनिषेगकाः पत्रसंस्था
मातरः स्युस्तदग्रे चाष्टभैरवाः कपालशूल
डमरुवेतालासक्तपाणयः दीर्घस्वराघावृ
ल्लाघावृन्हस्वाघाभैरवाश्चापि ततः षोडश
पत्रस्था वामाद्याः षणामविग्रहाः आदर्शार
त्नदीपं च व्यजनं ततः परम् नागवल्लीदलं
चैव चामरं स्नानकोशकम् वासोमाल्यात
पत्राणि आभरणं शुकसारिके चामरं रत्नव
धकं तालवृन्तं प्रदीपकं बिभ्राणा वामह-
स्ते श्रीदेव्याः शागान्यपाणयः रक्तवर्णाश्च
विमलाभाव पन्नर्वैपेदिमाः बालघ्नपुन्यः स
दीर्घाणं चतुः पत्रे तत्त्वार्चयेत् मातंग्याद्या
त्ता सुराघाद्याप्ताप्रांकुशापरा भयेः प्रलंक

तभुजारक्ताद्वितीयाचेन्दुसप्रभा अभिखेट
कशूलांकमुण्डहस्तातथापरा कुशांकुश
सरोजानि शालिपुंजंचबिभ्रती अरुणाबु
त्तिमहेमपत्रेवराभये स्थानाशपामवर्णा
वध्यात्तथामंत्रिसत्तमेः अग्निनैरृतवाय
रुद्रकोणेषुसंयजेत् गणेशादुर्गाबटुकक्षे
त्रपालान्बहिर्यजेत् चतुरस्रेलोकपालांस्त
स्त्राणिचतद्बहिरिति अथप्रयोगः तत्रप्रा
तः कृत्यादियोगपीठन्यासांतेमूलेनप्राणा
यामंत्रयंकृत्वाशिरसिदक्षिणामूर्तिऋ ष
येनमः मुखेगायत्रीछंन्दसेनमः हृदीश्री
मातंगेश्वरीदेवतायैनमः इतिविन्यस्य
ममसर्वाभिष्टसिद्धयेविनियोगः इतिकृ
तांजलिरुल्कारैं ह्रीं श्रीं क्लीं नमोभगवति
श्रीमातंगेश्वरिसर्वजनमनोहारिहृदयाय
नमः सर्वमुखराजिसर्वमुखरंजनीशिर
सेस्वाहाः सर्वराजवशंकरिसर्वस्त्रीपुरुष
वशंकरिशिखायैवषट् सर्वदुष्टमृगवा

शंकरि सर्वसत्त्ववशंकरि वामंवायुहे स
र्वलोकममुकं मे वशमानय नेत्रायवौषट्
स्वाहा अस्त्राय फट् इति षोडाविमंत्रैर्मंत्रव
र्णैः करषडंगन्यासान् विधाय शिरसि ऐं ह्रीं
श्रीं नमः ललाटे श्रों नमः भ्रूमध्ये नमो नमः
एवं तालुनि भगवति कंठे श्री मातंगेश्वरि
गले सर्वजनमनोहरि उरसि सर्वमुखराजि
अनाहते सर्वमुखरंजनि दक्षभुजे सर्वराज
वशंकरि वामे सर्वस्त्रीपुरुषवशंकरि ज
ठरे सर्वदुष्टमृगवशंकरि नाभिमण्डले
सर्वसत्त्ववशंकरि लिंगे सर्वलोकं गुह्ये
अमुकं दक्षपादे मे वामे वशं मूलाधारे आ
नय गुदे स्वाहा नमः मूलाधारे ऐं ह्रीं श्रीं रंसे
मातंग्यै नमः हृदि ३ प्रीत्यै भ्रूमध्ये ३ मनो।
भवायै। शिरसि ३ हूं हूं लेखायै मातंग्यै व
दने गगनायै मातंग्यै हृदि रं रक्तायै मात
ग्यै गुह्ये कं करालिकायै मातंग्यै [illegible] पार
योः मं महोच्छुष्मायै मातंग्यै सिरसि ह्रां ह्रा

वर्णैमातंग्यै पार्श्वयोर्ग्रीवायांश्रीवर्णैमातंग्यैमु
खेवंबंधिन्यैमातंग्यै गुह्येमांमोहिन्यैमातं-
ग्यैहृदये श्रींग्लांकार्षिण्यैमातंग्यै ललाटेमुखे
ऐंह्रींश्रींमन्मथायमातंग्यै ३ वामांसे ३ मक
रध्वजायमातंग्यैनमः वामपार्श्वे ३ मदना
यमातंग्यै वामकट्यां ३ पुष्पधन्वनेमातंग्यै
नाभौकुसुमायुधायमातंग्यै दक्षकट्यां ३
कंदर्पायमातंग्यै दक्षपार्श्वे ३ मानोभवायमा
तंग्यै दक्षांसे ३ रतिप्रियायमातंग्यै मुखे ३ अ
नंगकुसुमायैमा॰ वामांसे ३ अनंगमेखला
यैमा॰ वामपार्श्वे ३ अनंगमदनायै॰ वामक॰
ट्यां ३ अनंगमदनातुरायैमा॰ नाभौ ३ अनंग
मदनोद्वेगायैमा॰ दक्षकट्यां ३ अनंगसंभ
वायैमा॰ दक्षपार्श्वे ३ अनंगाभुवनपालिन्यै
मा॰ दक्षांसे ३ अनंगाशशिरेखायैमा॰ मूला
धारे ३ लक्ष्म्यैमा॰ लिंगे ३ सरस्वत्यैमा॰ म॰
णिपूरे ३ रत्यैमा॰ हृदि ३ प्रीत्यैमा॰ कंठेकी
र्त्यैमा॰ मुखेशांत्यैमा॰ भ्रूमध्येपुष्ट्यैमा॰ शि

त्रि॰ १
४७९

रसित्तुष्ट्यैमा॰ मूर्द्ध्नि मूलमंत्रेन्यसेत्‌ मूलेब्रा
ह्म्यैमा॰ स्वाधिष्ठाने माहेश्वर्यैमा॰ नाभौकौ
मार्यैमा॰ हृदि वैष्णव्यैमा॰ कंठेवाराह्यैमा॰
मुखेइन्द्राण्यैमा॰ भ्रूमध्येचामुण्डायैमा॰
शिरसिमहालक्ष्म्यैमा॰ मूले॰ उअसितांग
ायमा॰ स्वाधिष्ठानेरुरवे नाभौचण्डायहृ
दिक्रोधय कंठेउन्मताय मुखेकपालिने
भ्रूमध्येभीषणाय सिरसिसंहाराय॰ आ
धारेवामायैमा॰ लिंगमूले ज्येष्ठायैमा॰
नाभौरौद्र्यैमा हृदिशान्त्यैमा॰ कंठेश्रद्धायै
मा॰ भ्रूमध्येवागीश्वर्यैमा॰ बिंदौक्रियाश
क्त्यैमा॰ शिकलापदेलक्ष्म्यैमा॰ निरोधि
कायांसृष्ट्यैमा॰ अर्द्धेन्दौमोहिन्यैमा॰ नदे
प्रमथायैमा नादान्ते माविन्यैमा॰ उन्म
न्यांविद्युन्मालायैमा विष्णुवक्त्रेचिच्छक्त्यै
मा॰ ध्रुवमण्डलेसुन्दरानंदायैमा॰ प्रीवेना
गबुद्ध्यैमा॰ शिरसिऐंह्रींश्रीं मातंग्येनमः
ललाटेउ॰ महामातंग्यैमा॰ हृदिमहाल

क्ष्म्यैमामूले ३ उसिद्धव्ल्स्म्यैमा मूलाधारेमू
लंमंत्रंविन्यस्यतेनैवव्यापकं कुर्यात् ततो
ध्यानादिमानसपूजान्ते स्वर्णादिपटेकुंकु
मादिनासकेसरमष्टदलकमलंकृत्वा त
त्कर्णिकायांस्वाभिमुखंत्रिकोणंकृत्वाष्टद
लाद्बहिः षोडशदलंतद्बहिश्चतुर्दलंतद्ब
हिश्चतुर्द्वारोपेतंचतुरस्रत्रयंचकुर्यादिति
पूजाचक्रंनिर्माय स्वपुरतः पीठदेशेसंस्थाप्य
मूलेनाभ्यर्च्यार्घस्थापनाद्यात्मपूजान्ते म
ण्डूकादिज्ञानात्मार्चान्तेऽष्टदलकेसरेषु
ॐ ऐं ह्रीं श्रीं विभूत्यैमातङ्ग्यैनमः एवंउन्नत्यै
मातङ्ग्यै कान्त्यैमा सृष्ट्यै मा कीर्त्यैमा सन्नत्यै
मा बुद्ध्यैमा उत्कृष्ट्यैमा प्रम्यैऋद्ध्यैमातङ्ग्यै
नम इतिसंपूज्यऐंह्रीं श्रीं सर्वशक्तिकमला
सनायनमः इतिसमस्तपीठंसंपूज्यमूलं
मुच्चार्यश्री श्रीमातङ्गेश्वरीमूर्तिकल्पयामि
मीति मूर्तिपरिकल्प्यापुनर्मूलमुच्चार्यपर
स्यैश्रीमातङ्गेश्वरीमूर्त्यैनम इति मभ्यर्च्य

श्रि॰ १
४८०

480

तस्यां देवीमावाह्यावाहनादिप्राणप्रतिष्ठा
न्ते पाशांकुशवराभयखड्गचर्मधनुःशर
मौशलीदिग्गीवीणायोनिरीति हृद्रक्षामुद्रा
प्रदर्श्यासनादिपुष्पोपचारान्ते प्राग्वलया
गत्वेन देवीमूर्त्तौ षडंगानि संपूज्य त्रिकोणे
ग्रे श्रीं रत्यै मातंग्यै प्रीत्यै मा मनोभवायै मा
ई इति प्रादक्षिण्येनाभ्यर्च्य त्रिकोणाष्टदलये
रन्तराले मध्ये चतुर्दिक्षु च हूं त हूं त्लेषायै
मातंग्यै नमः गं गगनायै मा रं रक्तायै मा कं
करालिकायै मं महोच्छुष्मायै मा इति संपू
ज्याग्नीशासुरवायव्यमध्यचतुर्दिक्षु क्रमे
ण षडंगानि संपूज्य त्रिकोणाष्टदलयोरंत
राले एवं द्रां द्राविण्यै मातंग्यै नमः शों शोषिण्यै
मा बं बंधिन्यै मा मों मोहिन्यै मा आं आकृ
र्षिण्यै मा इति देव्यादिचतुर्दिक्षु पुनर्दे
व्यग्रे च प्रादक्षिण्येनाभ्यर्च्याष्टदलेषु देव
ग्रमारभ्य प्रादक्षिण्येन अनंगकुसुमायै
मा अनंगमेखलायै मा अनंगमदनायै ।

मा ॐ अनंगमदनातुरायै नमः ॐ अनंगमदनोद्वे
गायै नमः ॐ अनंगसंभवायै नमः ॐ अनंग भुवन
पालिन्यै नमः ॐ अनंगशशिरेखायै नमः इति
संपूज्य तद्ग्रेषु लक्ष्म्यै नमः तंग्यै सरस्वत्यै नमः
रत्यै नमः कीर्त्यै नमः प्रीत्यै नमः पुष्ट्यै नमः तुष्ट्यै नमः
ततो द्वितीयाष्टदलमूलेषु देव्यग्रादिप्रादः
क्षिण्येन ऐं ह्रीं श्रीं मन्मथाय मातंग्यै नमः ए
वं मकरध्वजाय नमः पुष्पधन्वने नमः कुसु
मायुधाय नमः कंदर्पाय नमः मनोभवाय नमः
रतिप्रियाय नमः पत्रमध्येषु ॐ ब्राह्म्यै नमः ॐ
माहेश्वर्यै नमः इत्यादि दलाग्रेषु ॐ असितां
गाय नमः इत्यादि भैरवाष्टकं संपूज्य षोड
शदलेषु वामायै नमः ज्येष्ठायै नमः रौद्र्यै नमः
शान्त्यै नमः श्रद्धायै नमः माहेश्वर्यै क्रियाश
क्त्यै लक्ष्म्यै नमः सृष्ट्यै मोहिन्यै प्रमथायै मा
विन्यै विपुल्लतायै विच्छेत्र्यै सुन्दरानं
दायै नागबुद्ध्यै ततश्चतुर्दलेषु ऐं ह्रीं श्रीं
मातंग्यै नमः माहामातंग्यै नमः माहाल

श्रि॰ १ ४८१

ध्येमा ईति संपूज्य चतुरस्रस्या भ्यन्तरे आ
ग्नेयादिचतुः कोणेषु प्रादक्षिण्येन ओं गणे
शाय नमः ओं दुर्गायै नमः ओं वटुकाय न
मः ओं क्षेत्रपालाय नमः इति अभ्यर्च्य तद्ब
हिः प्राग्वल्लोकपालावादि सर्वं समाप्येदि
ति तथा ~~ग्रजपेद्युतं~~ मंत्री मंत्रं पश्चाद्दशां
शतः त्रिस्वादुयुक्तैर्जुहुयात् मधूककुसु
मैर्वषी तर्पणं मार्जनं कृत्वा ब्राह्मणाराध
नं तथा एवं सिद्धमनुर्मंत्री साधयेदिच्छितं वां
छितं भाग्यार्थी जुहुयाज्जातीमालिकाना
गकेसरैः श्रीफलैश्चापि तत्पत्रैर्होमाद्धा
ज्यप्रियं लभेत् राजपुत्रः पंकजैः स्वांश्रि
यमाप्नोत्यनिंदितां लक्ष्मीपुष्पैः फलैः
श्चवशयेत्सकलं जगत् जपार्वधूकव
कुलैर्वृक्षवृक्षसमुद्भवैः सुमनोभिश्च जुहु
याद्वशाये वचमंत्रवित् मधुनाबहुनेन्मं
त्री सर्वसिद्धिर्भवत्फलं त्रिस्वादुसंयुतैः स
म्यग्वेतमाल्यैः समिद्वरैः जुहुयाद्दक्षीकाम

स्तुगुडूची भिर्ज्वरं हरेत् कदंबकुसुमैर्हुत्वा व
शयेत्सर्वमहाजनान् आयुःकामः प्रजुहुया
दूर्वाभिर्नात्र संशयः अन्नं प्रजुहुयान्मंत्री अ
न्नवान्भवते चिरात् शालितंडुलहोमेन ध
नाकुलेगृहो भवेत् होमद्रव्यं तु यत्प्रोक्तं त्रि
स्वाद्वक्तं तु तद्भवेत् नंद्यावर्तप्रसूनैः स्याद्धो
मो वाक्सिद्धिदः परं निंबप्रसूनहोमात्तु क
मलां वांछितां लभेत् हुमोल्कं शुकपुष्पैर्य
सम भवते जसां निधिः चंदनागरुकर्पूररोच
नाकुंकुमैरपि होमात्तु विश्वं सकलं वशये
न्नात्र संशयः अष्टाभिर्जपेरैस्तु तिलकं
जनमोहनं सिंदुवारस्य मूलानि होमयेद्द
हुमुक्तये उग्रगंधस्य तैलेन ससिक्तैर्लवण
हुनेत् अचिराच्छत्रुसंघं स नाशयेन्नात्र सं
शयः संचूर्णितनिशामिश्रैर्लवणैः स्तंभये
द्रिपूषान् परिपक्वै रतिरसैः फलैः पुष्पैः सु
गंधिभिः होमाद्धा वांछितमाप्नोति नात्र का
र्यविचारणा सारसंग्रहे बालात्रिबीजं वा

श्री०१
४८२

82

ग्बीजं मायां च कमलां वदेत् तारहृद्भगपा
नीयं त्ति श्रीमान्तमं वदेत् गेश्वपन्ते सर्व
ज्ञं ततो दीर्घं कालं च मनो वियत् रिमं सर्वमु
खरं साध्यं निस्मरो शक्तिरिन्दिरा मध्ये स
र्ववशं कुर्यौः पंचसप्तार्धारये क्रमात् राजं
स्त्री पुरुषं दुष्टं मृगं सत्त्वं परं वदेत् लोके
स्यादमुकं मे वशमानय युग्मकम् वैप
रीत्येन चाद्युक्तबीजषट्कान्तिको मनुः अ
क्षरै रष्टानवतिमितैरुदितः श्री॰ दरा
त् अयं मंत्रस्त्रिभुवनवशीकारः परः श्री
चार्यानुग्रहात्प्राप्यो महापुण्यतमैरयम्
दुःप्राप्यो कृतपुण्यानां मुनीन्द्राद्यैः सुसे
वितः वांछावितरणे कल्पपादपः परि
कीर्तितः बालात्रिबीजं पूर्वोक्तं वाग्बीजं
ऐं माया ह्रीं कमला श्रीं तारं ओं हृत् नमः
भगस्वरूपे पानीयं च त्तिस्वरूपे श्रीमा
न्तंस्वरूपे गेश्वरिस्वरूपे सर्वज्ञस्वरूपे
दीर्घान कालः मनोस्वरूपे वियतह

रिस्वरूपे सर्वसुखरंस्वरूपे मा घं जनिस्व
रूपे स्मरः क्लीं शक्तिः ह्रीं श्रीं ईं शिराः सर्व
राजवशंकरि सर्वस्त्रवशंकरि सर्वलो
कवशंकरि अमुकंस्वरूपे मेवशमान
यस्वरूपे द्युग्मकेस्वाहा वैपरीत्येन श्री
ऐं ह्रीं सौः क्लीं ऐं इतिक्रमेण मातंगमनु
काशी सिद्धेष्टनवतिपर्णात्मके मंत्रे सर्व
एव पटितफलाः मंत्रा भवंति तस्मान्मंत्र
मिमंसर्वदैवजपेद्विति क्षुष्यायाः पूर्वमुदि
ता मंत्रस्यास्य भवंतिहि ततस्तु मातृकां
न्यसेद्देवताभावसिद्धये पंचबाणानंगुली
षु विन्यसेत्साधको नमः मकरध्वजमंत्रं
चनलयोर्विन्यसेत्सुधीः मकरध्वजे मा
या हृल्लेखो वाग्भवादिकः मकरध्वजमंत्रो
यं सर्ववश्यकरः परः शिखाशिरोललाटे
भ्रूमध्ये नेत्रयुग्मके श्रोत्रयोर्घ्राणयोर्वक्त्रे
गंडयोः ककुदिक्रमात् अंसयोरूरसिन्य
सेत्स्तनयोर्हृदयाम्बुजे नाभिमंडलके

शि०१
४८३

लिंगे मूलाधारे परान्यस्या त्रियो विंशति संख्यानि त्रिश एकचतुस्तथा षडष्टसप्तके केकचंद्राष्टदशपंक्तिभिः वस्वष्टवन्हि चन्द्राक्षित्रिद्वित्रिक्रमान्न्यसेत् वेदुः पंक्ति १० वसु ८ वन्हि ३ अक्षि २ एकोनविं शतिं त्यक्त्वा मंत्राणि नादितः क्रमात् पदैः षड्भिः षडंगानि त्रिराद्यैः प्रकल्पयेत् का मशक्तीदिराबीजान्युक्तानि च शिखा मनो षट्दीर्घयुक्तमारेण षडंगं वा प्रकल्प येत् ब्राह्मिण्याद्याः पुनः पंच कुक्षौ पार्श्व पु गे हृदि मणिपूरक एवस्यात् ब्राह्म्यादि वि न्यसेत् ततः पदन्वसंधिषु ततो ह्यष्टौ लक्ष मादिकान्न्यसेत् सव्यमारभ्य दोर्द्वन्द्वसंधि षु क्रमतः सुधीः लक्ष्म्याद्याः पूर्वमुदिताः शक्तीरष्टौ प्रविन्यसेत् कोंते चैव भ्रुवोर्म ध्ये नेत्र श्रोत्र गुदेषु च नासायुग्मे मुखे गं डद्वंद्वे जिह्वाग्रे देशाके मूलाधिष्ठामतो लो च वामाद्याः षोडशान्न्यसेत् दक्षांहिं

मारभ्यपादद्वन्द्वसंधिषुभैरवान् मातंग्यादि।
चतुष्कंच हृद्दिनाभौष्ठिरोगुदे गणेशाद्दुर्गांवि
टुकक्षेत्रपालौस्ततोन्यसेत् कन्दमध्यास्यकं
ठेषुमुलेनाभ्यापकं न्यासेत् सरस्वतींतथा
लक्ष्मीनीधियुग्मं प्रविन्यसेत् आननेचव्यु
वोर्मध्ये चरणद्वयएवच एवंन्यस्ततनुर्मं
त्रीध्यायेद्देवीमनन्यधीः अमृतमहोदधि
मध्येरत्नदीपेसकल्पवृक्षवने मणिमय
मण्डपमध्येमणिमयसिंहासनस्योर्ध्वेमा
तंगीमधुपूरपानमुदितामाघूर्णमानेक्षं
णां संश्विपद्द्वदनाकदम्बकुसुमप्रोल्ला
सितद्वेणिकां वीणाशोभिकरांसुरक्तवस
नामापक्वबिम्बाधारांकस्तूरीतिलकांशा
शांकमुकटांसच्छंखपत्रश्रुतिं आपानी
न्नतशोभ्युरोजविनमन्मध्याशुपुकपाम
लांग्रैवेयांगदचारुहाररसनामंजीरसं
शोभितां भक्तौघंवरहास्यसस्मितदृशासं
तर्पयन्तीमुदाध्यायेत्पार्श्वगतंतथाखिल

शि।
५८५

84

कल्पारूपं प्रयुक्तं भावयेत् पूर्वोक्ते च शुभे पीठे पत्रमेतत्प्रकल्पयेत् त्रिकोणं पंचकोणं वा प्यष्टपत्रे कलाच्छदं अष्टपत्रे वेदद्दलं च रवेमनोरमं चतुर्द्वारसमायुक्तं सर्वशोभि मनोहरं अत्रावाह्य यजेद्देवीं मंत्री शृंगारवेषवान् आदौ लयोगमभ्यर्च्य भोगांगपूर्व वयजेत् पूर्वोक्तवद्वरत्नाद्या यजेन्मंत्री यथाविधि द्राविराद्याद्याः पंचकोणेष्वभ्यर्च्या मंत्रिणा सदा अष्टपत्रे यजेन्मातॄन्लक्ष्म्याद्याश्च तदंततः वामाद्याः षोडशदलेतत्तद्बाह्ये तदस्त्राणि ततो बहिः एवं संपूज्य मातंगीं यथाप्राप्तिं मनुं जपेत् पुनरप्यर्च्यागंधकं सामुष्मान्नैश्च पानकैः सद्दुग्धैश्च निवेद्य च देवीनं त्वा ततो बलिं दद्यात्क्रमेण मंत्रज्ञस्तेनसंमल्लभतेचिरात् नमो भगवती त्युच्छिष्टमातंगेश्वरि सर्वजन वशंकरि इमं बलिं गृहाण पुष्पं स्वाहा प्रादध्मयाचरेत् बलिमंत्रोपमाख्यातः सर्वकामफलप्रदः अ

यप्रयोगः तत्रा प्रातः कृत्यादियोगपीठन्या-
सान्ते मूलेन प्राणायामत्रयं कृत्वा शिरसि द
क्षिणामूर्त्तिऋषये नमः मुखे गायत्री छन्द
से नमः हृद श्रीमातंगेश्वरी देवतायै नमः
इति विन्यस्य मम सर्वाभीष्टसिद्धये विनि
योगः इति कृतांजलिरुक्त्वा प्राग्वन्मातृकां
विन्यस्य अंगुष्ठयो द्रों द्रां द्राविण्यै मातंग्यै नम
तर्जन्योः शों शां शोषिण्यै मातंग्यै नमः मध्य
मयोः बं बां बन्धिन्यै मातंग्यै नमः अनामिक
योः मों मां मोहिन्यै मातंग्यै नमः कनिष्ठिकयो
ः क्रों क्रां कर्षिण्यै मातंग्यै नमः करतलयो
ः ऐं मकरध्वजाय नमः इति विन्यस्य शि-
खायां ऐं क्लीं सौः नमः शिरसि ऐं ह्रीं श्रीं नमः
एवं ललाटे श्रीं भ्रूमध्ये नमो नमः दक्षनेत्रे
भगवति वामे श्रीमातंग्यै नमः करतलयोः
दक्षश्रोत्रे सर्वजनमनोहरि वामे सर्वमुख
रंजनि दक्षनासिकायां क्लीं वामयां ह्रीं दि
श्रीं नयं नाभौ मुखे श्रीं दक्षदण्डे सर्वराज

वशंकरि वामे सर्वस्त्रीपुरुषवशंकरि कु।
कुदि सर्वदुष्टमृगवशंकरि दक्षांसे सर्वस
त्ववशंकरि वामे सर्वलोकवशंकरि उर
सि त्र्यमुके दक्षस्तने मे वामे वशं हृदि त्र्यान
पनाभौ स्वाहा लिंगे श्रीं ह्रीं ऐं मूलाधारे सौ
क्लीं ऐं इति विन्यस्य: ऐं ह्रीं श्रीं सर्वजनमनो
हृदयाय नम: ३ सर्वमुखरंजनि शिरसे स्वा
हा ३ क्लीं ह्रीं श्रीं सर्वराजवशंकरि शिखा
यै वषट् ३ सर्वस्त्रीपुरुषवशंकरि कवचा
य हुं ३ सर्वदुष्टमृगवशंकरि नेत्राय वौष
ट् सर्वसत्ववशंकरि त्र्यस्त्राय फट् इति
करषडंगन्यासं विधाय कुक्षि दक्ष वामा
र्ध हृदय नाभिषु पुन ऐं विएणाद्या: पंचवि
न्यस्य दक्षिणपादांगुलिमूले श्रें ब्रह्मण्ये मातं
ग्यै नम: गुल्फसंधौ ईं माहेश्वर्यै मातंग्यै ए
वं दक्षजानु दक्षोरुमूल वामोरुमूल तज्जा
नुगुल्फसंध्यंगुलीमूलेषु कौमार्यादि महा
लक्ष्म्यंता विन्यस्य वाम दो मूले लक्ष्म्यामा

तंग्येनमः तन्मध्यसंधौ सरस्वत्यै मणिबं
धेरत्यै मा अंगुलिमूले प्रीत्यै मा दक्षकरां
गुलिमूले कीर्त्यै मा मणिबंधे कान्त्यै मा
मध्यसंधौ पुष्ट्यै मा मूले तुष्ट्यै मा सिरसि
वामायै मा भ्रूमध्ये ज्येष्ठायै मा दक्षिनेत्रे
रौद्र्यै मा वामे शांत्यै मा दक्षकर्णे ब्रह्मायै
मा वामे माहेश्वर्यै मा गुदे क्रियाशक्त्यै मा
दक्षनासि लक्ष्म्यै मा वामे सृष्ट्यै मा मुखे मो
हन्यै मा दक्षगण्डे प्रथायै मा वामे भाविन्यै
मा जिह्वाग्रे विद्युल्लतायै मा मूलाधारे चि
च्छक्त्यै मा स्वाधिष्ठाने सुन्दरानन्दायै मा ता
लुनि नागबुद्ध्यै मा दक्षपादांगुलिमूले अं
असितांगभैरवाय नमः गुल्फसंधौ इं रुरु
भैरवाय नमः जानुनि उं चण्डभैरवाय ऊ
रुमूले ऋं क्रोधभैरवाय वामोरुमूले ऌं
उन्मत्तभैरवाय जानुनि ऐं कपालिभैर
वाय नमः गुल्फसंधौ ओं भीषणभैरवा
य अंगुलिमूले अं संहारभैरवाय हृदि

शि॰ । ४८६

मातंग्यै नमः भ्रूमध्ये महामातंग्यै शिरसि सिद्धि
लक्ष्म्यै मा गुदे महालक्ष्म्यै मा शिरसि ग
णेशाय भ्रूमध्ये दुर्गायै मुखे वटुकाय कं
ठे क्षेत्रपालाय इति विन्यस्य मूलेन सर्वां
गे व्यापकं न्यस्य मुखे रक्तल्यै मातंग्यै नम
भ्रूमध्ये लक्ष्म्यै मा दक्षचरणे शंखनिधा
ये मा वामे पद्मनिधये मा इति विन्यस्य ध्या
नादिमानसपूजान्ते स्वर्णादिपट्टे कुंकुमा
दिना त्रिकोणं विधाय तद्बहिः पंचकोणं
तद्बहिरष्टदलं तद्बहिः षोडशदलं तद्बहि
श्चतुर्द्वारोपेतं च तुरस्रत्रयमिति पूजाच
क्रं निर्माय स्वपुरतः पीठदोले स्थाप्य मूले
नाभ्युक्ष्यार्घ्यं स्थापनाद्यात्मपूजान्ते प्रागुक्त
मूर्तिकल्पनादिपुष्पोपचारान्ते लयांग
मभ्यर्च्य त्रिकोणाभ्यंतरे प्रागुक्तषडंगा
नि संपूज्य त्रिकोणे प्रागुक्तरत्यादित्रयम॰
भ्यर्च्य पंचकोणे पुष्पबाणादिबाणपंच
कं दले ब्राह्म्यादि प्राग्दक्षिणेन नाभ्यर्च्या ष्टप

त्रेषु ब्राह्म्यादिकं तदग्रेषु लक्ष्म्याद्यष्टकं षो
डशपत्रेषु वामादिशक्तिषोडशकं बाह्ये
ष्टदले भैरवाष्टकं चतुर्दले मातंग्यादिच
तुष्कं चतुरस्रस्याग्नेयादिकोणेषु गणेशा
दिचतुष्कं देव्यग्रादिद्वारचतुष्टये न्यासोक्तं
सरस्वत्यादिचतुष्कं तद्बहिर्लोकपालांस्त
दस्त्राणि संपूज्य मूलमंत्रेण ऋष्यादिन्यासपू
र्वकं यथाशक्ति पूजयित्वा समर्प्य धूपदी
पौ नैवेद्यं प्राग्वत्संस्कृत्य ॐ नमो भगवति
मातंगेश्वरि इमं बलिं गृह्ण गृह्ण स्वाहा इ
ति नैवेद्यमुत्सृज्य देव्या उत्तरभागे वायव्य
दीशानान्तं पंक्तिक्रमेण ऐं ह्रीं गुरुभ्यो नम
ः एवं परमगुरुभ्यो नमः परमेष्ठिगुरुभ्यो ।
नमः परमाचार्यगुरुभ्यो नमः आदिसि
द्धगुरुभ्यो नमः अस्मद्गुरुभ्यो नमः इति सं
पूज्य समापयेदिति तथा पूर्वमेव जपेल्ल
क्षं पुरश्चरणसिद्धये पलाशपुष्पैस्त्रि
स्वादुयुक्तैरक्तेषु तं हुनेत तर्पणमार्जने

शि॰ ।
४८७
487

कुर्याद्भोजयेद्भूसुरानपि कुमारीभोजयेच्चा।
पि वप्रायेत्तू मोक्षयेज्जगतू मामतंगी विग्र
हो भूत्वा सर्वकर्माणि साधयेत्तू कुण्डे वा
स्थंडिले वा पंडिले वा पविस्थ्यात्काम्य।
कर्मेव रक्तवस्त्रपरीसांगो रक्तमाल्यानु।
लेपनः घृताक्तैगुग्गुलैर्हुत्वा राज्ञाः सर्व
पायेत्सुधीः मल्लिकाजातिपुन्नागैर्जुहु
याद्भाग्यवान्भवेत्तू राज्यार्थी बिल्वपत्रैश्च
हुनेत्पद्मैश्च रक्तैर्वीपिप्रसंहुनेत्तू उत्पलै
र्धनकामस्तु लक्ष्मीपुष्पैश्चहोमयेत्तू वं
धूकैश्चैव वागर्थी किंशुकैर्वकुलैर्हुनेत्तू
वप्रार्थीमधुसंयुक्तैः त्रुटिविशेषतः श्री
कामः श्वेतपद्मैश्च रक्तैर्वीपिच संहुनेत्तू।
उत्पलैर्धर्मकामस्तु लक्ष्मीपुष्पैश्च होम
येत्तू वंधूकैश्चैव वागर्थी किंशुकैर्वकुलै
र्हुनेत्तू वप्रार्थी मधुसंयुक्तैर्मधूककुसु
मैर्हुनेत्तू ॰ आकर्षणेनुलवणैस्तिलैर्मधु
रसंयुतैः वंजुलैर्वीहिमाप्नोति गुडचाभि।

ज्वरं हरेत् अन्नायजुहुयादन्नंधान्यार्थीशा
लितण्डुलैः गंधद्रव्येणहोमस्तुसौभाग्यदो
भवेत् कुंकुमैरोचनाभिर्वाहोमोवश्यार्थि
नोमतः नंद्यावर्तैश्चवागर्थी न्नपीनिम्बप्र
सूनकैः पलाशपुष्पैस्तेजोर्थीकपिलाज्ये
नवाहुनेत् शत्रोरुन्मादकृद्धोमउन्मत्तकुसु
मैरपि विषवृक्षोद्भवैर्निबारव्यश्लेष्मातकावि
भीतकैः विषवृक्षः कोचिलेतिप्रसिद्धः श्ले
ष्मातकेलसोरेतिप्रसिद्धः कान्यकुब्जभा
षायां उलूककाकगृध्रोत्थपक्षैस्तैलप
रिप्लुतैः तैलपरिप्लुतैः निंबतैलपरिप्लुतै
पिचुमंदस्कतैलसेचितैर्बिबिलिभुकोशिक
गृध्रपक्षैकैरितिमनुकोशवाक्यात् होमये
द्रिपुनाशायनिशायांवन्हिकुण्डकेवन्हि
कुण्डेत्रिकोणकुण्डे पायसैर्गुडसंमिश्रैः
खण्डैरिक्षुरसैस्तथा उन्मादनाशनोहोमः
पायसैर्घृतसंप्लुतैः मरितंतिलतैलाक्तैःका
शश्वासज्वरापहे निर्गुण्डीमूलहोमेनानि

शि०।
४८८
488

गडस्य विमोचने अथातः संप्रवक्ष्यामि जी
वस्याकर्षणं परं साध्यप्रतिकृतीः कुर्याच्च
ततो मंत्रवित्तमः एकां साध्यक्षेत्रमृत्स्नाम
धूच्छिष्टेन चापरां परां कुलालमृद्भूताशा
लिपिष्टोद्भवापरां हृदा लिखितसाध्या
ख्याः कृतासु स्थापनाप्तुमाः एतास्य स्याज्ज
पेन्मंत्रं मष्टोत्तरशतं पृथक् कुण्डाधो द्वि
गुलान्मूर्तिमुत्सानोत्तरूजां खनेत्तु स्वासना
धः पिष्टमंबा मह्रुत्यां निखनेत्ततः पादन्या
मस्य त्वाधस्ताल्लम्बयेदूर्ध्वमम्बरे मधू
च्छिष्टमयीमूर्ध्वपादान्तामप्यवाङ्मुखीम्
धूमेन स्पृशमानां वततो लोणं घृतप्लुतं
गुडमाक्षिकसंयुक्तं कुण्डे वपेत्ततः तेन प्रति
कृतिं कृत्वा स्पृष्टां गीमतिमज्जुलो रक्तमा
ल्याम्बरालेपे कृतन्यासविधिः स्वपं प्रा
तिमां पांतु संहाररवत्मनागुप्रविन्यसेत्ततः
नामप्रतिष्ठिनपाणान्मंत्रीतदनुपूर्वबा
नं रुसिनाम प्रधाच्छिल्वातां साध्यस्पृष्टेन

रूढवे अनले जुहुयात्साध्यं संस्मरं स्वनिशामु
खे एकोंघ्रिरूढमूलादिछिन्नीयोर्द्धशरीरतः तती
यो बाहुमूलादिचतुर्थो मस्तकेन च भागस्तु पं
चमो देक्षाघष्ठो देहार्द्धतः परः ऊरुमूलादिक
स्त्वेवं स्त्रीणां वामादिकल्पयेत् पुंसो दक्षिण
भागादिरेकं वा सप्तधा प पक्व अप्यैकदशां
शां वा गुल्फजानूरुखंडतः एवं सप्तधा हुतो ना
र्यः सेक्ष्यामदनातुरा खिद्यदंगा वेपमाना
साधकेन्यस्तमानसाः विघ्निघ्नस्य पुलेनांनुग
निबद्धवसनाः श्रुभाः त्राहि त्राहि स्वमत्वेतिपस्स
मानं परित्यजः इत्येवं सर्वाहत्याहरन्तः करुणा
पुलकमानसाः पतन्ति साधकस्याग्रे मदनानल
दीपिताः तिष्ठन्ति दासवच्चस्य मंत्रिणो योषि
तः सदा लवणं तिलं तैलेनाक्तं होमयेच्छत्रुना
शनं हरिद्राचूर्णसंयुक्तं लवणं स्तंभने मतं।
नक्षत्रवृक्षात्तत्राजे कारस्करश्चामलको
दुम्बरो जम्बुकस्तथा खदिरः कृष्णः वंशश्च
च पिप्पलो नागरोहिणोपलाशप्लक्षकाव

शि-१
४८९

489

ह्यैविल्वार्जुनविकंकताः वकुलःशारलःसर्जो
वंजुलःपनसस्तथा अर्के शमीकदम्बश्चाम्र
तोनिम्बस्तथैवच मधूकश्चेतिसंप्रोक्तोवृक्षा
मानोक्रमात्‌ श्रीसारसंग्रहे मातंगीप्रीतयेमं
त्रीभौमवारेप्रपूजयेत्‌ कन्यामेकांतथाति
स्नःपंचसप्तापिवापुनः स्वादुभिर्भक्ष्यभोज्यै
श्चखान्नपानैर्मनोहरैः पुष्पैर्धूपैस्तुदीपैश्च।
स्तुत्यापूज्यास्तुदेशिकैः वाणहस्तागायका
श्चपूज्याःसर्वेप्रगल्भताःसर्ववर्णारमण्यश्च
खान्नपानैर्मनोहरैः अर्चनीयाश्चमंत्रज्ञैःस
र्वभावेनसर्वदाः सर्वानार्योभावनीयाःश्रीपा
माएवात्रमंत्रिणा भौमवारेतथापिष्टमया
न्दीपांश्चकारयेत्‌ प्रज्वालयेतघृतेनैता
न्मातंगीप्रीतयेवुधः मातंगीप्रीतयेमंत्रीपा।
गिन्यष्टाष्टकंयजेत्‌ वाग्भवाद्याःप्रपूज्या
स्ताःप्रोच्यंतेनामपद्धतिक्रमे दिव्याद्यायोगिनी
पूर्वामहदाद्यातथापरा सिद्धादिकागणे
श्वर्यौप्रेतादिपिन्यापिकीर्तिता डाकिनीच।

तथाकालीकालरात्रिनिशाचरी ऊर्ध्वके
शीविरूपाक्षीशुष्कांगीभोजनीमता यष्टा
धारिणपित्तथावीरभद्रेप्ययपीरिता धूम्रा
दीषोडशाप्येताईशानादीन्प्रपूजयेत् कल
हाधाप्रियाचान्याराक्षस्यन्याप्रकीर्तिता ग
द्दिताघोररक्ताक्षीपर्वस्वरूपाभयंकरी वी
राधाचकुमारीस्यान्मुण्डचारिणपीरिता भ
यासुरारूढकार्यपिप्रोक्ताचभीषणात्रिपुरां
तकभैरव्योविध्वंसिन्यपिसंमता क्रोधिनी
दुर्मदाल्लेयाश्चाग्नेयादिप्रपूजयेत् हंसचादि
त्यादिपरवडांगीदीर्घालंबोष्ट्याचिता ता
पिनीमंत्रीयोगिन्योकालाग्निग्रीहिणीपरा
चक्रिन्यन्याचकंकालीभुवनेस्वर्यपीरिता
हुंकारीस्याच्चकौमारीपमहूतीकरालिनीनि
रूत्यादिपजेदेतायोगिनीः षोडशक्रमात्तके
शिनीमदिरापश्चात्लोमजंघाततथामथास्त्र
मधारिणपिपराल्लामरीकामुक्तीमता ला
मकाक्षीमुखीतद्वन्मताकुण्डाग्ररूपिणी

शि॰ १
४९०

व्याघ्रासर्वजरीचान्याविकराघोररूपासहक्क
पालिनीसमुद्दिष्टाषोडशप्ररिविनाशिनी
वापव्याद्दिप्रजेदेनायोगिन्यः षोडशाक्रमा
त् लक्षार्द्धं प्रजपेन्मंत्रंक्षामयेत्सर्वयोषि
तः पृथ्वीश्वरास्तदर्द्धेनवशायेन्नात्रसंश
यः तदर्द्धेनचसत्वानिवशगानिभवंतिहि
हृदस्थयोषितःसर्वाश्चापान्यपुत्तजापत
नेदीयसीस्तदर्द्धेनसमयोत्यबनिश्चितंस
हस्त्रत्रयतःसर्ववांछितानाप्निभेवेद्ध्रुवम् मा
तंगेशीमहामंत्रस्त्रिषुलोकेषुविश्रुतः स
कृदुच्चारमात्रेणसर्वलोकप्रियोभवेत् गो
पनीयःप्रयत्नेन भोगमोक्षफलप्रदः ॥ आ
दौचम्हिपुरेलिखेत्प्राविलद्वाकृशाक्तिना॰
माक्षरांत्तत्कोणेषुमनोभवाद्दितनयाल॰
क्ष्मीमनून्वाह्यतःषद्कोणेषुचबीजषद्कमप
रान्यत्रेषुपंचस्वस्याववह्नेभोधिरसाष्टसप्त
कमितान्मंत्रेस्यवर्णान्बहिःपत्रेष्टाष्टसुरु॰
दिग्मुद्दिग्पुगवसुद्वंद्वग्रहद्व्यक्षराननेतर्क॰

मन्त्रं तनस्य परितो मंत्रेण संवेष्टयेत् बाह्ये।
मातृकपाक्रमो क्रमवशान्साध्याक्षरैर्भूपुरं
भूगेहाग्निषु साध्यनामसहितं कामं लिखे
मंत्रवित् सुवर्णरचिते पट्टे लिखेन्यास्वर्णे।
रूप्ययोः राजते फलके वापि भूर्जे वा सुमनो
हरे सरोचनाकुंकुमचंदनैन कस्तूरिकाल
क्तकरक्तशीतैः स्वयं शुचिः साधुचमानस्यानो
सौभाग्यसिध्यै विलिखेच्च यंत्रं एतत्साधयंत्रं
लिखित्वैवं कृत्वा संपातपूर्वकं हुत्वा प्रजप्य।
संपूज्य गुलिकीकृत्य साधकः साभिषेकः
साधं बाहौ दक्षिणेन तु धारयेत् पूज्यते त्रिद
शाधीशैः किं पुनः मीनचोत्तमैः आयुरारोग्य
मैश्वर्यमन्यद्यत्स्ववाञ्छितं पुत्रपौत्रादिकं।
चापि लभते नात्र संशयः अस्यार्थः भूर्जादौ
प्रोक्तद्रव्यैः रुक्त लेखन्यात्रिकोणमालिख्य
तन्मध्ये साध्यनामसहितं वाग्भवबीजं श
क्तिबीजं चालिख्य तत्कोणेषु कामबीजं वा
शक्तिबीजं श्रीबीजं चालिख्य तद्बहिः षट्को

श्रि॰ १ एवं कृत्वा तत्कोणेषु स्वाग्रादि प्रादक्षिण्येन
६९१ मंत्राक्षिगतबीजषट्कमालिख्य तद्बहिः पं
491 चदलपद्मं विरचित प्रथमदले श्रीं नमः
द्वितीयदले भगवति तृतीये श्रीमातंगेश्व
रि चतुर्थे सर्वजनमनोहरि पंचमे सर्वमु
खरंजनीति स्वाग्रादि प्रादक्षिण्येन विलि
ख्य तद्बहिरष्टदलपद्मं विरच्य तद्दलेषु स्वा
ग्रादि प्रादक्षिण्येन कामपूर्वा श्रीबीजानि स
र्वराजवशंकरीति वा लिख्य द्वितीये सर्व
स्त्रीपुरुषवशंकरि तृतीये सर्वदुष्टमृगवशं
करि चतुर्थे सर्वसत्ववशंकरि पंचमे सर्वलो
कवशंकरि षष्ठे अमुकं मे वशमानय स
प्तमे स्वाहा अष्टमे तिमबीजषट्कं विलिख
तद्बहिर्वृत्तद्वयं कृत्वा तयोरन्तराले स्वा
ग्रादि प्रादक्षिण्येन मूलमंत्रेण वेष्टयेत् तद्ब
हिर्वृत्तं कृत्वा तत्रस्थवीथ्यां साध्यनामाक्ष
राणि विलोमरीत्या लिख्य क्षकारादाकार
न्तान्मातृकावर्णान्सबिंदूनालिख्य तद्बहि

हिरण्यतुरसेकृत्वा तत्कोणेषु साध्यनामयुत
कामबीजंलिखेत् एतद्यंत्रमुक्तफलदं भव
ति अथातइत्यादिसद्यःफलस्यजीवाकर्षण
प्रयोगप्रतिपादकस्यश्लोकसमुदायस्याय
मर्थः साध्यर्क्षवृक्षेणमधूच्छिष्टेनशालित
ण्डुलपिष्टेनकुलालहस्तमृत्तिकयाचैकै
कांपुत्तलींकृत्वातासांहृदयेषु अमुकमेव
शमानयेतिसाध्यनामालिख्यतासुसाध्यप्रा
णान्संस्थाप्यताःस्वस्वाग्रत्येकंमूलमंत्रमष्टो
त्तरशतंजपेत् अत्रमूलमंत्रजपे अमुकप
दस्थानेसाध्यनामसंयोज्यजपेत् अमुकप
दंद्रूपंपत्रमंत्रेषुदृश्यते साध्याभिधानंतद्रू
पंतत्स्थानेनिवेशयेदितिनारायणवचनात्
कुंडमध्येद्व्यंगुलाधःकाष्ठमयींपुत्तलीमुत्ता
नरूपांनिखायस्वासनस्याधःतथापिष्टम
यीस्ताःपादन्यासस्थानेमृण्मयींनिक्षिपेत् अ
त्रलवणेनसहनिखनेदितिसंप्रदायःततो
मधूच्छिष्टमयीमधोमुखीमूर्द्ध्वपादामर्के

श्रि॰ ।
५९२

तल्लतेलुल्लायादप्योर्वध्वाकुल्वा हूर्ध्वे धूमेन ।
स्पृश्यमानां लम्बयित्वा कुडवमात्रवर्णं घृत
मधुगुडसहितं स्म श्मांडोषयित्वा पुत्तलीं कृ
त्वा स्वयं यथोक्तयेषः न्यासादि पुत्तोलवर्णम
यां पुत्तल्यां मूलविद्यायाः प्रोक्तपदानि संहा
रीन्याविन्यस्यान्यानपि स्वदेहकृतन्यासात्त
स्यां संहाररीत्यैव विन्यस्य कृतप्राणप्रतिष्ठां
तां मूलमूलात्पादद्वयायांतमेकैकं भागं क
टेः कण्ठवधि देव्यैर्णा द्विधा कृतभागद्वयं पवा
हुद्वयेन भागद्वयं कण्ठ ऊर्ध्वे भागैकमिति
सप्तधा तीक्ष्णशस्त्रेण छित्वाऽहत्तस्तु तमे
कभागं संस्कृतेऽग्नौ साध्यर्क्षवृक्षसमिद्धे
साध्यं स्मरन् निशामुखे मूलमन्त्रेण जुहुया
त् । अग्रपवा एकमेकं भागं सप्तधा कृत्वोक्त
विधिना जुहुयात् । पद्वा गुल्फाद्वयं जानु ।
द्वयं छित्वै नैकादशधा कृत्वा जुहुयादिति
पुत्तलीमानन्तुमत्स्येन्दुसंहितायां । अथायाम
पादयोस्तस्याश्चाकल्याश्च तु रंगुलं मम् पादौ

नद्ध्यंगुलः कक्षितावद्देवांगुलः करः ग्रंगु-
लद्व्यमावक्रात्कं देशस्यमानकम् सशि
रोवक्रमानन्तुसार्द्धद्ध्यंगुलमीरितं द्वादशां।
गुलिभिः सर्वाः सम्यक्पुत्तलिकाः शुभाः इति
ग्रथमातंगमनुकोशे प्राक्सर्वलोकपदन
न्तत्तातीर्यराजलक्ष्मीचप्रदेद नेपं वनवत्य
क्षरोमंत्रः ग्रथमर्ष्येः प्रागुक्तद्धत्ताक्षाशीत्यक्ष
रराजमातंगीनी मंत्रे सर्वसत्ववशंकरि त्तिप
दान्तरं सौः राज्यलक्ष्मीप्रदे इति सप्ताक्षराणि
संयोज्यानन्तरं सर्वलोकममुकमित्यादिव
देदिति एवं पंचवत्यक्षरो मंत्रो भवति तथा।
ऋष्यादिपूर्वमुक्तं परद्दीर्घपुजास्वरेण ग्रंगवि
धिः विन्यसांगानिततो विचिंतयेन्मनुदेवता
मेवम् दीर्घपुजाग्रस्वरेणतेन ग्रांहृदयायन
मः शिरसस्वाहेत्यादिपः षडंगमंत्राः एवंपूर्वो
क्तप्रकारेण तेनराजमातंगिनी वध्यानपूजा।
दिकं सर्वन्नेयं [illegible] मायाहृद्दीरषांतेवह्नस्त्री
राजितेप्रोक्ता परमयाराजपूजीते इतितत्पुस्तो

शि।१
४९३

493

जयेविजये गौर्यपराजितेगौरिततोदेव्यंत्रिभुव
नपदंवशंकरिच सर्वस्त्रीपुरुषवशंकरि
सुसुदुदुघेच्च वावामायास्वाहा प्रणवादि
रयंभवेन्मंत्रः माया ह्रीं हृत्तनमः अग्र्यन्सर्वे
स्वरूपं तेनचतुः पचाशक्षाक्षरोपंमंत्रः प्रप
ञ्चसारेतु त्रिभुवनवशंकरणीन्तेसर्वलोक
वशंकरीति पदेप्रोक्तंप्रणवोनोद्धृतः तेना
।धिकपञ्चाक्षरोमंत्रः तत्रगौरीदेवतानिबद्ध
ः अत्रचतुःपंचाशदक्षरः पिरस्याजनर
छंदोनिवद्धापत्रमीरितंः प्राप्तेः वांछितफ
लदादेवीप्रोक्ताश्रीराजमातंगी अंगानिमा
यथास्यात् ध्यानंपूर्वोमेवविज्ञेयं ध्यानमि
त्युपलक्षणम् पूजाजयादिकमपितपेवज्ञे
पे गौरिदेवतापक्षेतु प्रपञ्चसारे सचतुर्दशी
भिस्तथाष्टाभिश्चषड्भिस्तथादशाभिःएका
दशाभिर्मंत्राक्षरैः क्रमाडच्यते षडंगविधिः
ह्रींनमोब्रह्मश्रीराजितेराजपूजितेजयविजयेगौरि
मः जयेविजयेगौरिगांधारित्रिपुरसे स्वाहा त्रि

भुवनवशंकरिशिखायैवषट् सर्वलोकव-
शंकरिकवचायहुं सर्वस्त्रीपुरुषवशं
करिनेत्रायवौषट् सुमुहुहुघेघेवावास्त्री
स्वाहा अस्त्रायफट् अमलकमलशशिराज
मौलिराबद्धपाशांकुशरुचिरकाराब्जा
बंधुजीवारुणांगी अमरनिकरवंद्या
त्रीक्षणाशोणलेपां पुष्पकुसुमयुता-
स्यात्सपदेपार्वतीनः आराधयेत्तदंगैर्मा
तामिराद्याधिपैस्तदस्त्रैश्च मातृभिर्व्रत
दिभिः अत्रगौरीदेवतापक्षेभुवनेश्वरी
पीठपूजनस्येप नत्र्येवक्ष्यते अयुतंप्र-
जपेन्जुहुयात्पायसैर्घृतप्लुतैदशांशेन
तद्वच्चतर्पणादिकुर्यादिष्टार्थसिद्धयेमंत्र
इति मातंगमनुकोशराजमुखिपदाद्रा
जामिमुखिवश्यपूर्वमुखिचपूर्वम भु
वनेशीश्रीकामान्वदेतनोदेवदेविपदं
तदन्तेमहादेविपदेपदंमपदेवाधिदे
वीति सर्वजनस्यमुखंममवशंकुरु।

शि॰ ।
५९५
494

ष्ठितनः स्वाहा प्रणवादिरयं मंत्रः प्रोक्तः श्री
वश्यमातंग्याः जपपूजाद्यं सर्वं विज्ञेयं राज
मातंगीवत् प्रपंचसारे दशभिः सप्तभिश्चै
व चतुर्भिः करणाक्षरैः पंचभिः सप्तदशा
भिर्वर्णैरंगक्रिया मनोः करणानि चत्वारि
तेन ऐं श्रीं राजमुखि राजाभिमुखि हृदया
य नमः वश्यमुखि ह्रीं श्रीं क्लीं शिरसे स्वा
हा देवदेवि शिखायै वषट् महादेवि कव
चाय हुं देवाधिदेवि नेत्राय वौषट् सर्वज
नस्य मुखे मम वशं कुरु कुरु स्वाहा अस्त्रा
य फट् मातंगमनुकोशे माया हृदोरथान्ते
हिलिपदं मुच्चस्य ततः चण्डपदान्मातंगि
नि वन्हेर्जायेति मंत्रोयं पूजाजपादि सर्वं सं
प्रोक्तं राजमातंग्याः अयुतजपात् घृतपाय
सहोमात् सिद्धो भवन्मंत्रः तथा वाग्भवं हृद
यं चाप्यश्रीमातंगिपदं वदेत् अमोघे स
त्यवादिनि मम कर्णे पदं न्ततः अवतर
पदं वीस्यसत्यं कथय तिकथ पपपदं राज्येहि

षडाम्भोपरतः श्रीमातंग्येनमस्तदनु वीस्म
द्विरुच्चार्य मंत्रोयं लक्षजपाद्दशांशहोमा
च्चपायसघृताद्यैः सिद्धिः कथयति शुभास्तु
मं पृच्छस्या श्रुतथा तस्मादपि प्रातगुणफ॰
लदं देव्या मूलमंत्रमप्यवाप्य सिद्धेनयेनव
हवो मंत्राः पठनेन सिद्ध्यंति व्राह्म्याश्रीवी
जं वालाबीजत्रयं ततः कामः मापाश्रीबीज
मयो श्रीमातंगेश्वरीतिपदं सर्ववशंकरि
पदंतः स्वाहाकारं ततश्चवदेत्तसद्यः फल
दो ह्येषः श्रीमातंग्याः मूलमंत्रोयं तस्माद
ष्टनवपक्षरमंत्रात् मंत्रोद्धारः सुगमः तथा
ऋषिरस्यदक्षिणामूर्तिश्छन्दोनिवृदन्विता
चगायत्री वांछितफलदा सैषा श्रीमातंगेश्व
रीदेवी वालाबीजैस्त्रिभिरथाद्भिः प्रोक्तैः कर
षडंगविधिः ध्यात्वा प्राग्वदेवीसम्यगांधादि
नार्चयेदुक्ता प्राग्वदष्टनवत्यक्षरमंत्रवत्।
पूजनमपितत्रोक्तमेव तथा श्रीमातंगीदेव
व्याः सिद्ध्यति मंत्रस्त्रिलक्षजपात् पुष्पैर्म

धूकजैरथमधुरत्रयप्लोल्लितैः कृतोहोमः
समितेनपायसेनचफलैश्चतथा कदल्या
फलदायिनी प्रपंचसारे कामिनिरंजनिठ
द्वयंस्वाहा ऋषिः संमोहनः छंदोनिवृत्त्रा
मास्यदेवतासर्वसंमोहिनीबीजंगंह्रिरावृति
पदैर्भवेत् शणामांगीवल्लकीदोर्भ्यांवाद्यं
तींसुभूषणाम् चन्द्रवत्तेसोविविधैर्गानैर्मो
हयन्तींजगत् पूजामातंगिनीपीठेरत्नाया
स्तुत्रिकोणके पंचबाणास्ततः पूज्याः केस
रेष्वंगपूजनं अनंगकुसुमाद्यास्तुपत्रेष्वग्रे
षुमातरः लोकपालैश्चवज्राद्यैः सप्तावृत्ति
रियंमता प्रजपेदयुतद्वंद्वंदशांशंजुहुयात्ततः
मधूकजैस्त्रिमध्वक्तैः सर्वसंमोहयेत्स्वागतं
प्रयोगः सुगमइति मातंगमनुकोशे उच्छि
ष्टचांडालिसुमुखीविद्यापवचण्डालिमातंगिपु
देवभूयः पदेततः सर्ववशंकरीतिनमोग्नि
पत्नीमनुरेषमध्ये नमः पदादिस्वाहान्तए
कोनविंशत्यक्षरोमंत्रः ऋषिर्ब्रह्माकेचित् वा

ण्डाल्लीति वकारस्य दीर्घत्वं वदंति तन्न हृच्छु
त्रैचान्तनेत्रेष्टकूर्मश्रेष्ठेवेन्दुखण्डवानितिमा
रसंग्रहे मंत्रोद्धारे वकारस्य ह्रस्वत्वदर्शनात्
श्रस्यभेदानाहतत्रैव तारत्रयादिर्मनुरेषज·
प्तः सर्वार्थसिद्धिं विदधातिनूनम् तारत्रयं वा
ग्वाया श्रीबीजात्मके तथा कामराज्यभुवने
श्वरिरमाबीजयुक्सपदि विश्ववश्यकृत् मं
त्रएवपदिवास्मरादिकः स्यादशेषघजनरंज
नक्षमः प्रथमोक्तत्रितारादिमंत्रस्य सतुं वरु
नारदऋषिरितिहतरयोस्तु मदनोस्य ऋषिः
प्रोक्तं छन्दोवदन्विताच गायत्री विश्वस्य व·
शाहेतुमातंगी देवताप्रोक्ता हंवह्निलोकान
लषट्द्विवर्णैरंगक्रियायस्य मनोः प्रदिष्टा
श्रंगानिमंत्रवर्णैः रेवंकृत्वाथदेवतां ध्याये
त् हृत्कृद्धयं वन्हयत्त्रयः लोकास्त्रयः मां तंगी
नवयावकाईचरणामुन्नासिकहसां प्युकां·
वीणा लनासिकरां सुमुन्नतकुचां मुक्ताप्र·
वालावलीम् हृद्यांगीसितशंखकुण्डलध

रांबिम्बाधरांसुस्मितामाकीर्णालकवेणिम
ञ्जनपर्णांध्यायेच्छुकश्यामलाम् रत्नस्वसु
दलयुग्मंचतुरस्रंपीठमेतस्याः अस्तेष्वारस्या
घाःपत्रेषुब्राह्म्याद्यास्ततोप्यर्च्याःमातंग्यंताःस
र्वाश्चानंगकुसुमादिकाश्चपत्रेषु देवीपार्श्वतः
त्याग्रेपूज्यास्ताबाणदेवताःसर्वाःअंगानिचत
स्रार्श्चैर्मध्येदेवींचयजेच्चपुनःअथप्रयोगःतत्र
प्रागवद्योगपीठन्यासंतेमूलेनप्राणायामत्रयं
कृत्वाकेवलनविद्यायाःतारत्रयादिविद्याया
वासतुम्बुरवेनारदायऋषयेनमःइत्तरवि
षयोर्मदनायऋषयेनमःनिवृद्गायत्रीछंद
सेनमःश्रीमातंगेश्वरीदेवतायैनमःइति
यथास्थानेविन्यस्यममसर्वाष्टसिद्धयेवि
नियोगःइतिउक्त्वानमःहृदयायनमःउ
च्छिष्टशिरसेस्वाहा चाण्डालिशिखायैन
मःमातंगिकवचायहुं सर्ववशंकरिनेत्राय
वौषट्स्वाहा अस्त्रायफट् इतिकरषडंग
न्यासविधायध्यानमानसपूजान्तेप्राग्व

स्यत्रांगोदिपदेकुंकुमादिनाष्टदलंहृद्दमन्ता
वीहिश्चतुर्द्वारयुक्तंचतुरस्रेतत्रपंचकुर्यात्तदि
तिपूजाचक्रंनिर्मायस्वपुरतःसंस्थाप्याभ्य
र्घ्यार्घ्यादिपात्रस्थापनाद्यात्मपूजांतेप्राग्व
न्मातेश्वरीपीठमभ्यर्च्यावाहनादिपुष्पोपचा
रांतेत्रिकोणकोणेषुप्राग्वद्वत्स्याद्याः सम्पू
ज्यत्रिकोणाद्बहिः पञ्चकर्णिकायामेवप्रा
ग्वत्पञ्चबाणान्षडंगानिचसंपूज्यप्रथमाष्ट
दलेषुब्राह्म्याद्याः द्वितीयेऽनंगकुसुमाद्या
संपूज्यचतुरस्रेलोकपालांस्तदस्त्राणिच
प्राग्वत्संपूज्यधूपादिशेषंसमापयेदिति
नया ऽथमनुलोपनेमविलोमितबाला
न्तस्यत्तथाजप्तःवाग्मितांवाकवित्वंचद
देगानस्यशक्तिमपि अन्यत्सर्वंप्राग्वदृषि
रस्यदक्षिणामूर्तिःअंगक्रियापुरोवद्बाला
बीजत्रयाभ्यासात् अंसवेणीकुसुमनिच
यांचूलिकानीलचूडांमुक्ताभूषांकुचनतां
वल्लकींवादयन्तीम् माध्वीमत्तांमधुरव

शि॰ १ ७९८

चनांष्पामल्लोंकोमल्लांगीमातंगीन्नांसक
लफलदांसंततंभावयामि त्रिकपंचकाद्दा
युगुलंषोडशाकाष्टोचतुष्चंच पीठस्मिन्से
पूज्याश्रीदेवी भक्तिभावेन त्रिकेचकोणं
पंचकादिपंचदलानिपद्मानि रुद्रेभ्यो र
त्याद्याइच्छाज्ञानक्रियाशक्तिश्च पंचदले
षुततोन्यो: प्रागवत्तावाणदेवता: कन्या:श्व
ष्टदलेषुब्राह्मायाः कन्यादीर्घस्वरै: क्रमा
त्पूज्या: बाह्येष्टदलेपिपज्येरत्नेगकुसुमा
दिकाश्चकन्यास्ता: पूज्याश्वषोडशकन्या
स्तुगंधाद्यै: उर्वशीकन्यकांपूर्वमेनकाक
न्यकांततः रंभाष्टताच्यो: कन्येचमञ्जुके
षणाश्चकन्यकां तथैवकाश्यपीकन्यांसुके
शीकन्यकान्ततः मञ्जुस्थल्या:कन्यकांच
पूज्ययेद्भक्तियोगतः सनागयक्षगंधर्वसिद्ध
किन्नरन्यका: विद्याधरकिंपुरुषपिशाच
नांचकन्यका:कन्याका: केन्पूजयद्धूपु
ष्पाद्यै:स्वनामाद्यक्षरान्विता:श्रीमपर्वपेत

तोष्टारेऽणिमासिद्धिकन्यकां महिमासिद्धि
कन्यकां च लघिमासिद्धिकन्यकाम् अपरका
यप्रवेशिन्याः कन्यकां पूजयेत् ततः कन्यकां
दूरदर्शिन्या गुटिकासिद्धिकन्यकां कन्यामं
जनसिद्धेश्च पादुकासिद्धिकन्यकां ततश्चतु
र्द्वारेषु पूजयेत् द्वारदेवताः ततश्च वितता
श्चाथ घनश्च शुषिरश्चाह अग्निकोणे पवटु
के गणेशं नैरृते ऽर्चयेत् पुनः सर्वोपचारैश्च
मध्ये भवतीं पजेत् स्वराः सर्वे श्रुतियुता वा
मभागे ततः परम् गणाश्च रागिणीयुताः पू
ज्याः पार्श्वे च दक्षिणे अभ्यर्च्य परमेश्वर्याः पा
श्वयोः शुकशारिके पुरतो गुरुपंक्तिं च स्वगु
रुं पूजयेत् ततः इति अथ प्रयोगः तत्र प्राग्वद्योग
पीठ नासान्ते शिरसि दक्षिणमूर्तिऋषये नम
मुखे निवृद्गायत्री छन्दसे नमः हृदये श्रीमातं
गेश्वर्यै देवतायै नमः इति विन्यस मम सर्वा
र्थसिद्धये विनियोग इत्युक्त्वा प्राग्वत् करष
डंगन्यासं विधाय अं संवेणीमित्यादिध्या।

शि०। ७१८

98

त्वामानसपूजान्तेश्रीमत्त्रिकोणगर्भपंचद
लकमलेन्तद्बहिरष्टदलद्वयंतद्बहिः षोड
शदलेततः पुनरष्टदलेतद्बहिश्चतुर्द्वारोपे
तंचतुरस्रत्रयमितिपूजाचक्रंनिर्मायप्राग्व
दभ्यर्च्यस्त्रघोघात्मपूजान्तेप्राग्वन्मातंगीपी
ठमभ्यर्च्यावाहनादिपुष्पोपचारान्तेत्रिकोणे
स्वाग्रादिप्रादक्षिण्येनरंरत्युच्छिष्टपादुकांपू
जयामि प्रींप्रीत्युच्छिष्टपादुकांपूजयामि मं
मनोभवोच्छिष्टपादुकां पुनस्त्रिकोणेष्वेव
ऐंद्रुंब्रुंछाशान्त्युच्छिष्टपादुकांपूजयामि ज्ञोंज्ञा
नशान्त्युच्छिष्टपादुकां क्रिंक्रीयाशान्त्युच्छिष्ट
पा० ततः पूर्ववदंगानिसंपूज्य पंचदलेषुद्रां
द्राविणीकन्यो्च्छिष्ट द्रींक्षोभिणीकन्यो्क्लीं
